श्रीः

उभयवेदान्तग्रन्थमाला

तर्कार्णव पण्डितरत्नेत्यादि बहुबिरुदविभूषितैः

अभिनवदेशिक श्री उत्तमूर् ति. वीरराघवार्यमहादेशिकैः

विरचितः

वैखानसविजयः

तच्छिष्यैः भारतराष्ट्रपतिसम्मानितैः महामहोपाध्यायैः

श्री.उ.वे. श्रोत्रियम् पैयम्बाडि चेट्टलूर्

वा.श्रीवत्साङ्कचार्यैः

विरचित-

वैखानसविजयभूमिका सहितः

अभिनवदेशिकान्तेवासिनां

सत्संप्रदायशेवधि पैयम्बाडि

श्री उ.वे. वेङ्कटवरदार्यमहादेशिकानां

सप्तत्यब्दपूर्तिमहोत्सवे चित्रभानु- कटक-पुष्ये

८-८-२००२ दिने प्रकाशितः

श्री उत्तमूर् वीरराघवाचार्यार् सेन्टिनेरि ट्रस्ट, चेन्नै

२००२

First Edition 1963
Second Edition 2002

Copy Right: Sri. T.Srinivasaraghavan
Sri. T.V.Rajagopal

Copies can be had from:

1. SRI UTTAMUR VIRARAGHAVACHARIAR CENTENARY TRUST
Regd. Off. Old.No.7, New No.19, Nathamuni Street
T.Nagar, Chennai-17
Phone: 815 60 53 / 815 62 35

2. SRI UTTAMUR VIRARAGHAVACHARIAR CENTENARY TRUST
Admn.Off. 11, Hastigiri Street
West Mambalam, Chennai-33
Phone: 483 46 66

Typset at

M/S.KRS GRAPHICS
APT.No.1, B/5, Krishnapuram Road
Choolaimedu
Chennai-94
PH: 2480 1268

Printed at

MLM PRINTERS
36 Arcot Road,
Chennai-24
PH: 2484 8349

श्रीः

श्रीपद्मावतीसमेतश्रीश्रीनिवासपरब्रह्मणे नमः

प्रस्तावना

महदिदं प्रमोदस्थानं, यत् वैखानसग्रन्थरत्नमालायां वैखानसविजयाभिधानस्य नूतनस्यास्य ग्रन्थरत्नस्यापि सङ्ग्रथनमिति । एतद्ग्रन्थरत्नप्रणेतृषु 'अभिनवदेशिकः' इत्याद्यन्वर्थबहुबिरुदविराजमानेषु विशिष्टतन्त्रविनीतेषु सर्वशास्त्रेष्वपि विरचित-विविधानेकप्रबन्धेषु विश्वप्रसिद्धेषु विशिष्टाद्वैतसिद्धान्तविजयध्वजायमानेषु श्री.उ.वे.उत्तमूर् वीरराघवाचार्यस्वामिपादेषु, तथैतत्प्रबन्धप्रणयनप्ररोचकमहाशयेषु विश्वविदितेषु वैखानसागमीयबहुग्रन्थपरिष्करणप्रकाशनादिसद्व्यापारनिरतेषु अद्य च तिरुमलै तिरुपति देवस्थाने आगमाचार्यपदे विराजमानेषु वैयाकरणपञ्चाननादिबिरुदभाक्षु पण्डितश्रेष्ठेषु श्री रोंपिचर्ल पार्थसारथिभट्टाचार्यवर्येषु, एवं श्रीवेंकटाद्रिप्रभृतिषु महत्सु दिव्यदेशेषु नित्यादिपूजाविधौ आद्रियमाणे वैखानसशास्त्रे च सर्वविवेकिजना इव अहमपि चिरात् महतीं गौरवबुद्धिमावहन्नस्मि । तस्मादेव एते भट्टाचार्यवर्याः एतत्पुस्तकमुद्रापणकैङ्कर्ये कृत्वा सद्य एव कार्यमिदं भगवतः श्रीवेंकटेश्वरस्य कृपया पर्यपूरयम् । अनेन भगवत्कर्मणा भगवान् प्रीयतां श्रीवेंकटेशः ।

ममैतादृशसदवकाशलाभे हेतुभूतयोः पूर्वनिर्दिष्टयोर्महतोर्विषये एतद्ग्रन्थानुमोदकानां जगत्कल्याणजागरूक -श्रीकाञ्चीकामकोटिपीठाधिपानां, पण्डितराज. श्री उ.वे.डि.टि. तातार्यमहोदयानां, पण्डित, श्री.उ.वे. वेदान्तं जगन्नाथाचार्याणां भूमिकाप्रदात्रूणां वावदूकाग्रगण्य श्री उ.वे.डि.रामस्वाम्यय्यंगार्-महाशयानां च विषये महतीं कृतज्ञतां निवेदयामि ।

इति

सुधीजनविधेयः

आचार्यदीपप्रकाशकः,श्री कल्याणमय्यङ्गारपरनामधेयः-

श्रीनिवासराघवाचार्यः

तिरुपति

कर्णालवीथी

३-७.१९६४

॥ श्रीः ॥

अनुमोदनम्

तर्कार्णवादिविविधविरुदभूषितैः प्रज्ञाविशेषशालिभिः पण्डितोत्तमै
नानाशास्त्रसम्बन्धिप्रौढानेकग्रन्थकृद्भिः उत्तमूर्-श्रीवीरराघवाचार्यैः निबद्ध
सर्वजनकल्याणकरणप्रावण्यातिशयेन अन्वर्थभूतया 'कल्याणमय्यङ्कार्' इत्याख्यया प्रसिद्ध
श्री पत्तङ्गि श्रीनिवासराघवाचार्यैः प्रकाशितः 'वैखानसविजयो' नाम ग्रन्थः आमूलाग्रमक्षरश
व्यलोकि ।

वैखानसागमस्य वैभवं यथावत् प्रतिपादयितुं प्रवृत्ता आचार्याः भगवतो विष्णो
पारम्यं, जीवानां तच्छेषतया तत्कैङ्कर्यधनित्वं, ध्यानस्य भक्तिरूपस्योपायत्वं
आगमप्रधानप्रतिपाद्यस्य अर्चनस्य वर्णाश्रमधर्मविलक्षणत्वभक्त्यन्तर्भावौ, एव
वैदिकार्थैकपरतयास्यागमस्य वैदिकत्वं, प्रत्यक्षवेदशाखामूलकत्वं, मनुप्रभृतिभिराद्दतत्वं
पाञ्चरात्रागमेन सहास्योपजीव्योपजीवकभावादिकं च अनितरसाधारण्या रीत्या
प्रसन्नविशुद्धमधुरगम्भीरया वाक्यशैल्या च सोपपत्तिकं निरूपयन्ति ।

यया कयापि विधया यस्याः कस्याश्चिदपि न्यूनताया वक्तुमशक्यत्वात्
वेदानुसारिशास्त्रान्तरवदत्यन्तमादरणीयत्वाच्च अयमागमो विजयते
औपनिषदविद्यान्तरात्मकभक्तिनिष्ठवत् एतदुपदिष्टार्चनात्मकभक्तिनिष्ठाश्च विजयन्ते
एतन्निरूपणात् ग्रन्थो वैखानसविजयो भवति ।

३-१-१९६४
तिरुपति

D. T. TATACHARYA, M.O.L.

॥ श्रीः ॥

अनुमोदनम्

श्रीमद्भिः कल्याणकृद्भिः कल्याणगुणशालिभिः कल्याणमय्यंगार्यैः प्रेषितं सर्वतन्त्रस्वतन्त्रैः श्रीमन्निगमान्तमहादेशिकैरिव तत्त्वविद्भिः बहुबिरुदभूषितैः श्रीमदभिनवदेशिकैरप्यनुगृहीतमेतं विजयं सानन्दमन्वविन्दम् । सोऽयं श्रीविजयः श्रीपार्थसारथिबलाद्विजय इव विजयं समाकलयति तदीयानामिति महान् विश्वासः । अत्र सैद्धान्तिकफलपर्वविभेदस्तु संप्रदायविभेदनिबन्धनः । परविभेदः पराधीनः स च नान्तरीयकः । आस्ताम् । तमेतमपि संप्रदायं सम्मानयति श्रीमन्निगमान्त-महादेशिकश्रीसूक्तिरिव श्रीमदभिनवदेशिकश्रीसूक्तिरपीति न पुनरुक्तिः । महान् सन्तोषः । परोक्तिर्हि न परोक्तिरिति पारिशेषिको वादः । मधुरतरोक्तिर्हि परानप्यानन्दयतीति इयं न वाचोयुक्तिः । अतो ह्यभूवन्नधमर्णास्सर्वथा विजयिन इति परं तत्त्वम् ।

समीकुर्यात्सर्वमपीदं सर्वज्ञः स भगवान् श्रीनिवास इति निवेदयति ।

इति

विधेयः

तिरुपति
२०-७-१९६४

पण्डितः वेदान्तं जगन्नाथाचार्यः
तिरुमल तिरुपति देवस्थान आस्थानविद्वान्,

॥ श्रीः ॥

अनुमोदनम्

श्रीमत्परमहंस-परिव्राजकाचार्यवर्य-श्रीमच्छंकरभगवत्पाद-प्रतिष्ठितश्रीकाञ्ची-कामकोटिपीठाधिप - जगद्गुरु-श्रीमच्चन्द्रशेखरेन्द्रसरस्वती-श्रीपादादेशानुसारेण

श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः क्रियते नारायणस्मृतिः ।

'तर्कार्णवे'त्याद्युपाख्याविख्यातैः उत्तमूर् ग्रामाभिजनैः श्रीवीरराघवाचार्यैः विरचितः, आचार्यदीपप्रकाशकबिरुदालंकृतैः श्रीनिवासराघवाचार्यैः प्रकाशितश्च वैखानसविजयनामा लघुर्निबन्धः प्राप्तः ।

नैककृतिकृता ग्रन्थकृता स्वीयकुलदैवतस्य श्रीवेंकटाद्रिनिलयस्य भगवतः श्रीनिवासस्य स्वीयैः सांप्रदायिकैः मुख्यत्वेन परिगृहीतस्य अर्चारूपमूर्तिविशेषस्य बहोः कालादाचर्यमाणां अन्यत्र च बहुत्र दिव्यदेशेषु प्रायशः विशिष्टैः शिष्टैः अनुष्ठीयमानां वैखानसपरिचर्यापद्धतिं प्रामाणिकत्वेन परमोत्कृष्टत्वेन च व्यवस्थापयितुमेषः प्रबन्धो निरमायि ।

स्वयं पाञ्चरात्रप्रकाशितपदवीं पारम्पर्येणानुसरन्नपि सोऽयं ग्रन्थकृत् सविशेषं वैखानसोक्तपरिचर्यापद्धतिं मुक्तकण्ठं च स्वीयनिबन्धे यत् प्रशंसति, तदिदमेकमेव पर्याप्तं प्रमाणं वैखानसविजये वास्तविके । तदीयानि च वस्तुतत्त्वावगमकानीमानि वचांसि - 'भगवतः पुरुषोत्तमस्य नानाविधासु परिचर्यासु प्राणिनां भोगमोक्षप्रदासु वैखानसोक्तपद्धतिरपि अन्यतमा तत्र तत्र विशिष्टशिष्टानुष्ठीयमाना अत्रिभृगुमरीचिकाश्यपविखनोमुनिमुखैरनेकैः महर्षिभिः प्रचारमापादिता पुरस्कार्यैव' 'क्वचिदवतरता पुंसा नान्यनिन्दा गुणाय' 'वैखानसभगवदर्चनपद्धतिगौरवोक्तिरपि स्वस्य विष्णुसमर्चनैव' 'पाञ्चरात्रवैखानसशास्त्रयोः समाराध्यस्य भगवतो मूर्तिविशेषस्य नामभेदेऽपि अर्थैक्यमधिगम्य सामरस्यमनुसन्धेयम्' 'पाञ्चरात्रवैखानसशास्त्रयोः

परस्परमधिकारिभेदेन अनुष्ठानप्रकारभेदसत्त्वेऽपि न दोषः, यतः अनुष्ठानवैषम्यं न सामरस्यविरोधि' स्वीयाऽऽचार्यपुरुषाणां श्रीवात्स्यवरदार्यगुरूणां वैखानसपाञ्चरात्रैक-रस्यानुभावी 'आमोदे भुवने प्रमोद उत संमोदेऽपि' इत्यादिश्लोकोऽपि अनुभाव्यः-'वेदान्तदेशिकैरपि वैखानसप्रामाण्यं सम्यक् स्थापितं न्यायपरिशुद्ध्यादौ'' इत्यादिना । वास्तविकसामरस्यदृष्टयः तत्प्रचारकाश्च विरला एव एतादृशाः विद्वांसः । एतादृशो विद्वान् मुक्तकण्ठं श्लाघमर्हति सहृदयानाम् ।

कुमारमङ्गलम्
शोभकृत् फाल्गुन शुद्धद्वितीया

नारायणस्मृतिः

श्रीः

कृतज्ञतानिवेदनम्

कदाचिदहं विद्वद्धरेण्यान् श्री.उ.वे. उत्तमूर् श्रीवीरराघवाचार्यस्वामिनः "तत्र भवद्भिः वैखानसशास्त्रमधिकृत्य कश्चन लेखः लेखितव्यः" इति अप्रार्थयम् । ते तु मत्प्रार्थनां अंगीकृत्य सत्यपि बहुकार्यव्यग्रत्वे अचिरादेव 'वैखानसविजया'भिधानमिमं ग्रन्थं विरच्य मह्यमदुः । एतेषां सर्वशास्त्रनिष्णाततायां दुरूहार्थविचारनिर्णयचातुर्यादिषु च पाठकानां हृदयान्येव प्रमाणीभवितुमर्हन्तीति नात्र मया किमपि वितन्यते । सर्वथाऽहं एभ्यः अधर्मण इति मदीयां कृतज्ञतां परं निवेदयामि ।

यदत्र वैखानसप्राशस्त्यप्रबोधनपरे ग्रन्थे प्रायशः पाञ्चरात्रप्राशस्त्यस्यापि न केवलं आगमप्रामाण्यागमडम्बर -पाञ्चरात्ररक्षादिग्रन्थप्रतिपादितया प्रक्रियया, अपितु नूतनयाऽपि पद्धत्या निरूपणं, तदिदमप्रकृतस्वपरोत्कर्षापकर्षप्रतिपादनविभ्रान्तमिति च केचिन्मन्येरन् । नेदं तत्त्वम् । सावधानं ग्रन्थमिमं परामृशतां वस्तुस्थितिर्भायादेव । पाञ्चरात्रस्य कदाचिदप्रामाण्यशंका काचित् बभूव । तदपनोदनाय ब्रह्मसूत्रकारप्रभृतयोऽपि तत्र व्याप्रियन्त, स्थापयामासुश्च तत्प्रामाण्यम् । ईदृशाप्रामाण्यशंकावकाशलेशस्यापि वैखानसशास्त्रे असंभावितत्वात् बहोः कालादारभ्य स्थितं अप्रकम्प्यं प्रामाण्यं नापोदितुं शक्यत इति तुल्यबलप्रामाण्ययोः साक्षात् मोक्षसाधनप्रतिपादनपरयोः वैखानसपाञ्चरात्रयोः पाञ्चरात्रापेक्षया वैखानसं विशिष्यतेतरामिति प्रबोधनाय तत्र तत्र पाञ्चरात्रप्रस्तावः कृतोऽस्तीति तु तत्त्वम् ।

तदिदं ग्रन्थकारहृदयं वैखानसस्य परमवैदिकत्वं तस्याप्रकम्प्यं प्रामाण्यं अत एव सर्वातिशायित्वञ्च अधो निर्दिष्टैः तद्वाक्यैरेवावगन्तुं शक्यम् । यथाः-१७-१८ पुटयोः- "सात्त्वतप्रक्रिया कलियुगप्रक्रमे प्रचारं प्रापीत्यवगम्यते ।.....वैखानसं तु..... अनाशंकितप्रामाण्यं अप्रामाण्यशंकनप्रसञ्जकवाक्यलवलेशेनापि विधुरं सर्वविवेकिसमादृत-प्रामाण्यमेव व्यजयत । अत एव शङ्करभाष्येऽपि पांचरात्रस्येषदंशेऽप्रामाण्यमानिनि,

भगवदर्चनपद्धतिप्रदर्शकस्य पाञ्चरात्रस्य कथमप्रामाण्यमिति अप्रामाण्याक्षेपवचनमुखेन वैखानसप्रामाण्यस्याप्रकम्प्यत्वमसूचि । अतो वैखानसस्य वैदिकोत्तमत्वं सर्वसम्प्रतिपन्नम्'' । एवं ग्रन्थावसाने ३७ पुटे–''एवमपि वैष्णवपरम्परामात्रेण विखनोमुनिप्रभृतिसेव्यमानं वैष्णवबलिना गर्भत एव वैष्णवभूतानां संघ एव संप्राप्तप्रचारं चत्वारिंशत्संस्काराविशेषेण आवश्यकतया विष्ण्वर्चनविधायकं अत एवोपादेयानुपादेयविवेकश्रमप्रसक्त्यभावात् अक्षोभानुष्ठेयसर्वं उपनयनप्रभृति समिदाधानवत् तदनुष्ठाननैर्भर्यदर्शकं, अत्रिभृगुमरीचिकश्यपाख्यानेकमहर्षिप्रचारितत्वेपि अप्राप्तमिथोविरोधं, सर्वप्रजायोगक्षेमदृष्ट्या सर्वफलप्रसावकत्वेन मोक्षमात्रपराणां तदनुकूलत्वेन च निबद्धं श्रूयमाणवेदशाखानुसारि वैदिकमन्त्रैकसाध्यतया सर्वप्रतिपादकं सत् श्रूयमाणवेदवैशद्यवहं, सर्ववर्णाश्रमधर्माणामपि भगवदाराधनतां सम्यगवगमयत् परमं शास्त्रं वैखानसमिति वस्तुस्थितिरियं तत्त्वरुचिभिरमत्सरमधिगम्येति ।'' इत्यादयः वैखानसस्येतरापेक्षया विशिष्टवैलक्षण्यं प्रतिपादयन्तीति स्पष्टम् । किमत्र विस्तरेण ।

तुष्यतु पक्षे 'प्रायेण सामग्रयविधा'विति महाकविसूक्तिः स्मारिता भवतीति सर्वमनवद्यम् ।

ग्रन्थमिमं मुद्रणार्थद्रव्यव्ययभरं कृत्स्नमूह्य मुद्राप्य प्रकाशितवतां सर्वदा लोककल्याणकर्मकरणेन ''कल्याणमय्यंगार्'' इत्यन्वर्थनामभाजां, 'आचार्यदीपप्रकाशके'ति सार्थकबिरुदभूषितानां श्री.उ.वे.पि.बि. श्रीनिवासराघवाचार्यमहोदयानां विषये सर्वदा सर्वधा चाहं कृतज्ञतामाविष्कुर्वन् दयादेव्या आलिङ्गितः श्रीश्रीनिवासः तेभ्यो निरन्तरं सर्वकल्याणप्रदो भूयादित्याशासे ।

इति

सुधीजनविधेयः

आकुलमन्नाडु-आर्.पार्थसारथि भट्टाचार्यः

तिरुपति

१८-७-१९६४

First Edition

FOREWORD

Srimate Nigamanta Maha Desikaya Namah
Sri Srinivasa Parabrahmane Namah.

My esteemed friend Acharyadeepaprakasaka Sriman U.Ve. P.B. Srinivasaraghavacharya Swamy, alias Sriman Kalyanam Iyengar Swami of Tirupati, the publisher of this fine brochure "VAikhanasavijaya" from the pen of a very eminent scholar, has laid a command on me to write a Foreword to it. His command issued to me in this sacred month of Margasira has impelled me to disregard my own utter incompetence and unworthiness for the task. That is my only apology for writing this Foreword.

Sage Vikhanas, who was the founder of the system, and promulgator of the Vaikhanasa Sootras on which is based the Vaikhanasa Agama, is regarded as Lord Narayana Himself. Based on those Sootras of Vikhanas, four Samhitas sprung up, Atri, Kasyapa, Mareechi and Bhrigu being the authors of those respective Samhitas. This Vaikhanasa Agama like the other Agama Pancharatra, is a Vaishnava Agama and extols the efficacy of Archana or worship of the Moorta or Image of Maha Vishnu as the highest form of worship of the Lord. In one sense it may be said that Vaikhanasas lay greater stress and emphasis on the potency of Archa-aradhana than even the votaries of Pancharatra. As pointed out at page 15 et seq of the book, the term Vaikhanasa finds a place in the Vedas and the Upanishads. The Vaikhanasa system has got its roots more firmly in the Vedas than even Pancharatra. While Acharya Sankara has doubted the authority of Pancharatra in his Sootrabhashya he has not questioned the authority of the Vaikhanasa system. Thus the Vaidikottamatvam of the Vaikhanasa system is accepted on all hands (p.18).

Notwithstanding the foregoing, the great Vaishnava Acharyas have not noticed in their works this system as much as they have the other system of Pancharatra.I do not know if I am right in stating that there is no reference at all to this system in any of the nine works of Sri Ramanujacharya. That does not of course mean that great Acharya was not aware of it or had not great regard for it, any more than one can say that because there is no reference to the Divya Prabandhas of the Alwars in Ramanuja's works therefore he was not aware of them or had not much regard for them. Vedanta Desika the illustrious successor to Ramanuja in the heirarchy who closely followed Ramanuja has dealt with Vaikhanasa Agama in several of his works such as Nyayaparisuddhi, Sri Pancharatra Raksha, Satcharitra Raksha and so on. In his beautiful Stotra "Saranagati Deepika" sung by him in praise of Lord Deepaprakasa, the presiding Deity of his birth place in Kanchi, Desika has equated Vaikhanasa with Pancharatra thus:

"Tvaam Paancharaatrika nayena prithagvidhena
Vaikhaanasena cha patha niyataadhikaaraah"

By referring to the one or the other in the alternative he has shown how the two systems are of equal validity.

With all that there has been a need for a compendious treatise on the Vaikhanasa system and our great and revered Acharya, Srimad Ubhaya Vedanta Vidwan Uttamoor Veeraraghavacharya Swamy has very ably supplied that need by writing out his excellent treatise about this System.

Vedanta Desika had given to us Sri Pancharatra Raksha and our Abhinava Desika has now given to us a Vaikhanasa

Raksha, only he has modestly named it as Vaikhanasa vijayah. In the 38 pages of this book he has brought out the greatness of the system, its chief tenets, its conception of tattva, hita and purshartha, the peculiar place that the adherents of this system occupy among the vaishnavits, taking care at almost every point to compare and contrast with the better known Pancharatra system. Only a scholar of his eminence can produce a consise and compact treatise like the present one on such a topic. Any words of praise from me about this great Acharya who is the recipient of the President's Award will be like holding a candle light to make the sun visible.

The Acharya's Ishta Devata is Lord Srinivasa of Tiruvengadam. That Lord reveals in the name "Vaikahanasa-muni-sreshta Poojitaya" uttered daily in His Presence during Archana. Vaikhanasa Vijaya is therefore a fitting tribute to the great system employed in His worship paid by one of his great devotees, whom the world today looks up to for light and guidance in matters relating to philosophy and religion.

MADRAS-7,
"TOOMANI"
24.12.63

D. RAMASWAMY,
Advocate

वैखानसविजयभूमिका

(महामहोपाध्यायः श्रोत्रियम् पैयम्बाडि.चेट्टलूर् वासुदेव श्रीवत्साङ्काचार्यः)

अस्मदाचार्यैः जगद्विख्यातैः अभिनवदेशिकैः श्रीवात्स्य वीरराघवार्यमहादेशिकैः अनुगृहीतेषु ग्रन्थरत्नेषु वैखानसविजयोऽप्येकः । श्रीमद्विशिष्टाद्वैतसिद्धान्तावलम्बिषु विद्वद्वरेण्येषु पाञ्चरात्रावलम्बनं श्रीमन्नाथमुनिमिश्रकालादारभ्य संलक्ष्यते । एवं वैखानस-ग्रन्थानां प्रमाणत्वेनोदाहरणमपि क्वचित् क्वचिद् दृश्यते । श्रीमन्निगमान्तमहागुरुभिः श्रीपाञ्चरात्रविषये इव श्रीवैखानसागमविषयेऽपि ग्रन्थेषु विचारः प्रवर्तितः । श्रीवैष्णवागमाः द्विविधाः- पाञ्चरात्रम् वैखानसम् इति । नेत्रद्वयमिवागमविभागद्वयमपि विशिष्टाद्वैतिनाम् । अत्र "बहुधा ह्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः । त्वय्येव निपतन्त्योघाःजाह्नवीया इवार्णवे" इति महाकवेः कालिदासस्य वचनं (रघुवंशे दशमसर्गे देवैः कृतायां भगवत्स्तुतावयं श्लोकः) नूनं पाञ्चरात्रवैखानसरूपागमविभागद्वयमभिप्रेत्यैव प्रवृत्तमित्यभ्युपगमे न किञ्चिद-साङ्गत्यम् । पूरी-जगन्नाथक्षेत्रे, गुरुवायुपुरे श्रीकृष्णक्षेत्रे, पण्डरीपुरे पाण्डुरङ्गक्षेत्रे अन्यत्रापि प्रसिद्धेषु श्रीविष्ण्वालयेषु केनापि आगममार्गेण (अत्र सर्वत्र न वैखानसपाञ्चरात्रागमयोः क्रमः आद्दतः) भगवत्पूजा निर्वर्त्यते । तत्रापि कालिदासश्लोकदिशा व्याख्या कार्या । किं बहुना? शाक्तशैवागमादिरीत्या देवतान्तराराधनमपि तत्तद्देवताकश्रुकस्य भगवतः समाराधनमेवेति कालिदासोऽभिप्रैति । आमनन्ति खलु-"आकाशात् पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रति गच्छति" इति । सरित्सागररूपोपमैव कालिदासेनापि अत्र श्लोक उपात्तेत्यवधेयम् । तत्र वैखानसविषये प्रमाणं वा एतत् इति चर्चैव नोत्पन्ना; यतः वैखानससूत्रस्य प्रचारे विद्यमानत्वात्, आपस्तम्बादिभिरपि याजुषकल्पसूत्रकारैः पौण्डरीककुण्डविधानविषये वैखानससूत्रस्य प्रमाणत्वेनाद्दतत्वात् ।

पाञ्चरात्रविषये विचारः बहोः कालादारभ्य वर्तते एव । तदा तदा विद्वद्भिः पाञ्चरात्र - प्रामाण्यविषये ग्रन्था आरचिताः । आगमप्रामाण्यस्य अन्ते विद्यमानेन

"तत्तत्कल्पितयुक्तिभिः शकलशः कृत्वा यदीयं मतं
यच्छिष्यैरुदमर्दि सात्त्वतमतस्पर्धावतामुद्धतिः ।

यच्चेतः सततं मुकुन्दचरणद्वन्द्वास्पदं वर्तते
जीयान्नाथमुनिः स्वयोगमहिमप्रत्यक्षतत्त्वत्रयः।।"

इति श्लोकेन ज्ञायते श्रीमन्नाथमुनिशिष्यवर्गेषु बहवः श्रीपाञ्चरात्रागमप्रामाण्य संस्थापकग्रन्थनिर्मातार आसन् इति । श्रीमन्नाथमुनीनां पौत्राः शिष्यपरम्परागताश्च श्रीमद्यामुनमुनयः श्रीपाञ्चरात्रप्रामाण्यार्थं आगमप्रामाण्यनामकं ग्रन्थं निर्ममुः; न केवलमेतावत् एकायनशाखाया अपौरुषेयत्वस्थापकं काश्मीरागमप्रामाण्याख्यं ग्रन्थमपि स्वग्रन्थे प्रास्तौषीदाचार्योऽयम्। स च ग्रन्थः एतदाचार्यकर्तृक एवेति च कश्चन वादः त्रिंशत्संवत्सरेभ्यः प्राक् केनापि उपक्षिप्तः, अस्माभिः सप्रमाणमन्यकर्तृक एवेति संस्थाप्य वाङ्मुखरूपेण प्रत्युत्तरितश्च । आस्तामेतत् । श्रीमन्निगमान्तगुरुचरणानां काले पुनरपि प्रकारान्तरेण पाञ्चरात्रागमानां प्रामाण्यमधिकृत्य विवादोऽद्वैतिभिर्धूलीप्रक्षेपन्यायेनोपक्रान्तः, सम्यग् आचार्यैर्निराकृतश्च श्रीपाञ्चरात्ररक्षाग्रन्थद्वारा । एवं तत्तत्कालेषु पाञ्चरात्रागमविषये एवाक्षेपः कुतः? इत्यत्र अस्मदाचार्या एवमुल्लेखम् अभ्यधुःकस्मिंश्चित् त्रेतायुगे अयोध्यातः श्रीविभीषणेन श्रीरङ्गनाथः लङ्कां प्रति निनीषुणा श्रीरामभद्रात् स्वीकृतः कारणान्तरवशात् भगवत्संकल्पमन्यथा विद्यमानं विज्ञाय श्रीरङ्गक्षेत्रे प्रतिष्ठापित इति च श्रीपारमेश्वरादिषु संहितासु स्पष्टम्, श्रीपद्मपुराणादिषु च । उत्तरदेशे श्रीमतो रङ्गनाथस्य अर्चनादिकं पाञ्चरात्रागमरीत्याऽऽसीदिति अद्यापि तदालये पाञ्चरात्रिकरीत्या प्रतिष्ठार्चनादीनां दर्शनेन ज्ञायते । इदम्प्रथमं दक्षिणदेशे पाञ्चरात्रागमप्रस्तावः तत आरभ्याभूत् । ततः पूर्वतनात् कालात् प्रभृति प्रसिद्धेषु श्रीवेङ्कटाद्रिश्रीपार्थसारथिक्षेत्र (तिरुवल्लिक्केणि) प्रभृतिषु श्रीवैखानसागमानुसारेण प्रतिष्ठार्चनादिकं प्रचाल्यमानम्, अद्याप्यनुवर्तमानं दृश्यते । प्रायो जनाः नूतनविधया परिष्करणे, नव्यस्य मार्गस्य (तस्य प्राचीनत्वेऽपि अत्र देशे इदम्प्रथमं प्रविष्टस्य मार्गस्य) आश्रयणे च विमनायमाना भवेयुः । अतः नूतनोऽयं मार्गः प्रमाणभूतो वा? इति विपश्चित्सु विचारः स्वयमेवोदेति । तदेव पाञ्चरात्रप्रामाण्यस्थापने निदानम् इति ।

एतादृशी रीतिः श्रीवैखानसागमानां विषये कदाऽपि नोत्पन्ना । अत एव वैखानसप्रामाण्यस्थापनार्थं ग्रन्था न विद्वद्भिर्निरमायिषत । वैखानससूत्रस्य परिमितैरेव

द्विजैः परिगृहीतत्वात्, इतरसूत्रनिष्ठानां सार्वत्रिकवदत्रादर्शनात्, प्रतिनियताधिकारिकस्यास्य कथं प्रामाण्यम्? इत्याशङ्कामपाकर्तुं श्रीवासुदेवस्वामिभिः श्रीवैखानसप्रामाण्यप्रतिष्ठापको ग्रन्थ आरचित इति श्रीपाञ्चरात्ररक्षाप्रथमाधिकारे आचार्यैरभिहितम् । तत्रत्या आचार्यसूक्तय एवम्-

"...प्रसिद्धप्रामाण्ययोः परिग्रहप्राचुर्यवतोः प्रसिद्धतरेषु श्रीरङ्गश्रीमद्वेङ्कटाद्रि-श्रीहस्तिशैलवृषभगिरिप्रभृतिषु पारम्पर्येण प्रवृत्तयोः व्यासादिनिबद्धश्रीवैष्णवधर्मशास्त्र-कर्मकाण्डादिषु "कथं त्वमर्चनीयोऽसि? मूर्तयः कीदृशास्तु ते? । वैखानसाःकथं ब्रूयुः? कथं वा पाञ्चरात्रिकाः? ॥ श्रीभगवानुवाच-

श्रृणु पाण्डव तत् सर्वम् अर्चनाक्रमम् आत्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ।।

अष्टाक्षरविधानेनाप्यथ वा द्वादशाक्षरैः ।
वैदिकैरथवा मन्त्रैः मम सूक्तेन वा पुनः ।।

स्थापितं मां ततस्तस्मिन् अर्चयित्वा विचक्षणः ।
पुरुषं तु ततः सत्यम् अच्युतं च युधिष्ठिरः ।।

अनिरुद्धं च मां प्राहुः वैखानसविदो जनाः ।
अन्ये त्वेवं विजानन्ति मां राजन् ! पाञ्चरात्रिकाः ।
वासुदेवं च राजेन्द्र! सङ्कर्षणम् अथापि वा ।
प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते ।।

एता अन्याश्च राजेन्द्र! संज्ञाभेदेन मूर्तयः ।
विद्ध्यनर्थान्तरा एव मामेवं चार्चयेद् बुधः ।।"

इत्यादिभिः वैष्णवशास्त्रभेदत्वेन समपरिपठितयोः वेदाविरुद्धयोः भगवद्यामुनि-वासुदेवस्वामिप्रभृतिभिः स्थापितप्रामाण्ययोः अविशेषवैष्णवसमयपरिग्रहयोः श्रीमत्पञ्चरात्र-

वैखानसशास्त्रयोः द्वयोः....." इति । एतेन कियद् गौरवम् आचार्याणामुभयोरागमयोरि सावधानैर्विभाव्यम् । किञ्चात्र प्रथमं श्रीवैखानसशास्त्रस्य भगवता प्रशंसनम्, तत्रत्यमूर्तिभेदाः इत्यादीनां प्रपञ्चनमपि विशेषतोऽवधातव्यम् । एतेनैव श्रीवैखानस. शास्त्रस्याभ्यर्हितत्वमपि सूचितम् ।

"विखनसार्चितो विश्वगुप्तये सख उपेयिवान् सात्त्वतां कुले" इत्यत्रापि प्रथमं श्रीविख. नसा अर्चितत्वं भगवतः प्रतिपाद्य, तस्यैव परमात्मनः सात्त्वतां कुलेऽवतारोऽभिहितः श्रीशुकेन । सात्त्वताः= वासुदेव-सङ्कर्षण - प्रद्युम्नानिरुद्धाः इति व्यक्तं पाञ्चरात्रिक. संहितासु । इतोऽपि वैखानसस्य शास्त्रस्य प्राथम्यं सुदृढम् ।

तर्हि वैखानससूत्रानुसारिणां नियमेन श्रीवैष्णवत्वम्, लोके क्वचिदेव तदनुसारिणां स्थितिः, वैष्णवेतरैरपरिगृहीतत्वं तत्सूत्रस्य इत्यत्र किं निदानम्? इति नाशङ्कनीयम् । अस्याक्षेपस्य समाधिराचार्यैरेव न्यायपरिशुद्धौ शब्दाध्यायद्वितीयाह्निकेऽभिहितः । तद् यथा-

"तत्र तावत् कल्पसूत्रं नाप्रमाणम्, इतरवदेव कल्पसूत्रत्वात् । तत्कर्तुश्च कल्पसूत्रकारत्वप्रसिद्धेः वेदाविरुद्धत्वात्, वैदिकमन्त्रैरेव सकलकर्मविधानात्, सूत्रान्तराणामपि कुण्डसन्निवेशलक्षणादिषु क्वचित् क्वचित् तदुपजीवनात् । वर्णाश्रमधर्माणाम् अनुकूलं नारायणपरत्वप्रतिपादनादेरपि सत्त्वमूलत्वेन प्रामाण्यैक-हेतुत्वात् । "हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेष्वपि", "ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु" इत्यादिना शौनकादिभिरपि तथैव विधानात्, वंशपरम्परया च वैखानसैः अधीयमानमानतया विप्लवस्यानवकाशात्" -इति ।

अत्र 'सत्त्वं विष्णुप्रकाशकम्' 'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः' 'सत्त्वात् सञ्जायते ज्ञानम्' इत्याद्यनुसारेण सत्त्वमूलत्वेन इत्याचार्यैरभिहितम् ॥ मनुरपि स्वस्मृतौ नारायणमेव प्रास्तौषीत्, नान्यान् देवान् । अतः प्राचीनैः परमर्षिभिः परमात्मत्वेन भगवत एव निर्धारणात् वैखानससूत्रेषु श्रीविष्णोः परत्वेन ग्रहणं, तदनुगुणं पूजार्चनादिनिरूपणं च "हेम्नः परमामोदः" इति न्यायमेवानुसरति । तैत्तिरीयसंहितायाः सूत्रकाराः आपस्तम्ब-बोधायन-सत्याषाढ- हिरण्यकेशि-भरद्वाजप्रभृतयः

अष्टाधिकाः सन्ति । तेषु विखनस्सूत्रमपि एकम् । आपस्तम्बसूत्रस्यैव प्रायेण परिग्रहो दृश्यते । तदनु बोधायनसूत्रस्य । सत्याषाढ-हिरण्यकेशि- भरद्वाजसूत्राणामनुयायिनोऽतीव विरलाः । तत् कुतः? । तद्वदेव प्रकृतेऽपि भवितुमर्हति । न तावता अप्रामाण्यम्; प्रत्युत पूर्वोक्तदिशा पौण्डरीकादिषु आपस्तम्बप्रभृतिभिरस्योपादानात् आपस्तम्बसूत्रापेक्षयाऽपि प्राचीनत्वमेव हि सिद्ध्यति । उपजीव्यापेक्षयोपजीवकस्यार्वाचीनत्वं हि लोकवेदोभयसम्मतम् । किं बहुना? शुक्लयजुर्वेदीयं याज्ञवल्क्यब्राह्मणम् अवरकालिकम् इति स्पष्टमभिहितं कात्यायनेन - ''याज्ञवल्क्यादिभ्यः प्रतिषेधोऽवरकालत्वात्'' इति । स्पष्टमिदं 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (४-३-१०५) इत्यत्र महाभाष्ये । तद्वदत्र न कुत्रापि अर्वाचीनत्वमस्य सूत्रस्याभिहितम् ।

इयान् विशेषः- पाञ्चरात्रग्रन्थेषु भगवत्पूजार्था दीक्षा इतरेषामपि= कुलक्रमागत-पाञ्चरात्रशास्त्रानुसारिव्यतिरिक्तानामपि अभ्युपगता, वर्तते च आचारे । अत्र वैखानसागमविषये एवं नाङ्गीक्रियते, कुलक्रमागतैस्तैरेव आलयादिषु अर्चाविधानमनुमतं, नान्येभ्योऽर्चादीक्षोपदिश्यते इति, अयं च क्रमः शैवागमदीक्षितैरप्यनुपाल्यते इत्यतो नायं दोषः ।

इदमत्रावधेयम् - प्रत्यक्षश्रुतिषु कुत्रापि प्रतिष्ठार्चनादीनामश्रवणात्, तदाधारीकृत्य प्रवृत्तमिदं शास्त्रं कथं प्रामाण्यमर्हति? इति प्रश्नः । तदिदमुक्तं पूर्वपक्षसिद्धान्तरूपेणाचार्यैरेव परमतभङ्गे-

''कर्षणादिप्रतिष्ठान्तक्रियाकलापानाम् उपरि प्रतिपादितानां चर्याविशेषाणामपि अद्यात्र उपलभ्यमानेषु वेदेषु मूलं न दृश्यते चेदपि - प्रतिषेधवाक्यानामभावात् कल्पसूत्रादि-प्रतिपादितधर्मविशेषाणामिव मूलकल्पना सुकरा । अयमर्थः 'श्रुतिमूलमिदं तन्त्रं प्रमाणं कल्पसूत्रवत्' इति अस्मिन्नेव शास्त्रे प्रतिपादितम्'' इति । श्रीपाञ्चरात्रागमविषये प्रस्तुतोऽप्ययं विचारः तुल्यन्यायादत्रापि सङ्गच्छते । अष्टकाश्राद्धादिविषये मीमांसकैरेवमेव निर्धा-रितम् । 'यां जनाः प्रतिनन्दन्ति' इति मन्त्रस्य श्रवणात्, अस्य अष्टकाश्राद्धकरणमन्त्रत्वेन ब्राह्मणादिषु स्पष्टं विनियोगाश्रवणेऽपि श्रुतिमूलत्वं कुमारिलप्रभृतिभिरभिहितम् ।

तद्वदत्रापि। किञ्च, "तस्माद् आत्मज्ञम् अर्चयेद् भूतिकामः" इति श्रुतिषु दृश्यते । आत्मज्ञानां भगवद्भक्तानां दिव्यसूरीणाम् आचार्याणामपि प्रतिष्ठार्चनादिकमनेन वाक्येनाभ्यनुज्ञातमिति वस्तुस्थितौ स्थित्यां कथं भगवत्प्रतिष्ठार्चनादीनाम् अश्रौतत्वं ब्राह्मणगर्दभो मन्यते? इति सुधियो विभावयन्तु । तदेतत् भक्तप्रतिष्ठार्चनादिकं न केवलं वैष्णवेषु, वैष्णवेतरागमानुयायिष्वपि दृश्यते । "आदिभक्तानाम् अनन्तगरुडादीनाम् इच्छावतारभेदा इमे (=भूतसरोवेतालविष्णुचित्तशठजित्प्रभृतयः) इति पुराणप्रसिद्धम्; तेन तेषां प्रतिष्ठा अर्चनादिकं रामकृष्णादिभगवदवतारादीनामिव इति भक्तप्रतिष्ठाशास्त्रानुसारेण निर्णेतव्यम्" (अलेपकभङ्गवादे शतदूषण्याम् आचार्याः) इति आचार्यश्रीसूक्तिरिहानुसन्धेया । अतो भगवतस्तद्भक्तानां च प्रतिष्ठार्चनादिकं श्रुतिस्मृतिसिद्धमेव ।

'न तस्य प्रतिमाऽस्ति' इति श्रौतवाक्यस्य भगवन्मूर्तिनिषेधे न तात्पर्यम्; अपि तु प्रतिमा= उपमा इत्यर्थः । "न तत्समश्चाभ्यधिकश्च दृश्यते" "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव" इत्यादिसमानार्थकमिदं वाक्यम् । अत एव गीतायां "अप्रतिमप्रभाव!" इति श्रौतप्रतिमाशब्दव्याख्यानमित्यप्यवगन्तव्यम् । 'अश्नामि प्रयतात्मनः' इत्युक्तं गीतायाम् । अशनं नाम गलबिलाधस्संयोगरूपो व्यापारः । स च मूर्तिं विना न शक्यः । अतः समूर्ताराधनमेव गीतोपदिष्टम् । एवं "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्" इत्यत्रापि अपरिच्छिन्नस्य सर्वगतस्य दिव्यात्मस्वरूपस्य स्मरणासम्भवात् सहोपात्तपादसेवनशब्दसाहचर्याच्च समूर्तोपासनमेव धर्मशास्त्रकारसम्मतम् । "याःक्रियाः संप्रयुक्ताः स्युरेकान्तिगतबुद्धिभिः । ताःसर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम्" (भारतम्) "मदर्चास्थापने श्रद्धा स्वतः संहृत्य चोद्यमः" (भागवतम्) इत्यादिषु ऋषिभिरयमेव पन्थाः स्पष्टमभिहितः । विशिष्य वैखानसशास्त्रोक्तप्रकारेण भगवदर्चनं मनुना स्पष्टमुक्तम्-

"कालपक्वैः स्वयं शीर्णैः वैखानसमते स्थितैः" (मनु.६.२१) इति । वानप्रस्थविचारावसरे बोधायनः स्पष्टमेवमाह-"वानप्रस्थो वैखानसशास्त्रसमुदाचारः" (बो.धर्मसूत्रे) इति ।

तदुपरि कश्चन क्षुद्रोपद्रवः- वैखानसानां विप्राणां विष्णुभक्तत्वेनैव दर्शनात्

देवतान्तरसम्बन्धवर्जनात् कथमेषु आश्वासः? इति । तस्य समाधानमाचार्यैरेवाभिहितम् "समानशीलैः सह वासो न दोषाय" इति कपिलानुशिष्टस्य कैमुत्येन गृहस्थादिष्वपि मोक्षार्थिषु तुल्यप्रसरत्वात् । आमनन्ति च बह्वृचाः- "नेदंविद् अनिदंविदा समुद्दिशेत्, न सह भुञ्जीत, न सधर्मादिः स्यात्" इति" इति । "सर्वः सगन्धेषु स्निह्यति" इति न्यायेन नायं दोषः । 'स्थानेऽन्तरतमः' (१-१-५०) इति सूत्रे महाभाष्येऽपि स्पष्टमभिहितः सगन्धयोर्मिथः स्नेहः । स एव न्यायोऽत्रापि । "आविद्यः प्राकृतः प्रोक्तो वैद्यो वैष्णव उच्यते । आविद्येन न केनापि वैद्यः किञ्चित् समाचरेत्" "अद्य प्रभृति हे लोकाः! यूयं यूयं वयं वयम् । अर्थकामपरा यूयं नारायणपरा वयम् । नास्ति संगतिरस्माकं युष्माकं च परस्परम् । वयं तु किङ्करा विष्णोः यूयम् इन्द्रियकिङ्कराः" इत्यादिप्रमाणप्रदर्शनपूर्वकं आचार्यैरेवात्र सुबहु निरूपितम् । मांसभोजिभिः साकम् अमांसभोजिनां सहवासाभावो यथा न दोषाय, तथाऽत्रापि इति अभ्युपगमनीयम् ।

श्रीपाञ्चरात्रशास्त्रवत् अस्मात् वैखानसशास्त्रात् पूर्वाचार्यैरसकृदुदाहरणं कुतो वा न कृतम्? इत्यन्यः प्रश्नः । अत्रेदमवधेयम् - विशिष्टाद्वैतिभिः अनुष्ठानविषये बहवोंऽशाः अनादिकालादारभ्याद्दताः । तेषां मूलं श्रीपाञ्चरात्रसंहितासु स्पष्टमुपलभ्यते इत्यतस्तत्र भूयान् आदरः । यथा-तप्तचक्रशङ्खधारणम्, शरणागतिः, प्रपन्नपूर्वोत्तरतत्कालकृत्यानां विवेचनम्, भगवदाराधनवैशद्यम् । श्रौतत्वेऽपि द्वयादिमन्त्रस्वरूपार्थादिविवेचनम् (यथा-श्रीप्रश्न - संहितायां द्वयमन्त्राद्याक्षरोद्धारक्रमेण विशदीकरणम्), पूजाकाले घण्टायाः आघोषणम् (न हि घण्टानादनविषये उपलभ्यमानेषु व्यास-दक्षादिनिर्मितेषु धर्मशास्त्रेषु कल्पसूत्रेषु वा प्रस्तावो वर्तते), अभिगमन-उपादान - इज्या-स्वाध्याय-योगरूपेण कालविभागः तत्तत्कालेषु कर्तव्यानां कर्मणां स्वरूपनिरूपणम् इत्यादिकं, श्रीविशिष्टाद्वैतिसमाद्दतानाम् अंशानाम्, विशिष्य "पञ्चधा पञ्चात्मा" इति उपनिषत्सु निर्दिष्टस्य परमात्मस्वरूपपञ्चकस्य निरूपणं पाञ्चरात्रादिसंहितास्वेव सुविशदम् । अतोऽत्र भूयान् आदरः । प्राधान्येन भगवत्पारम्यं, श्रियः परत्वम्, श्रीवैकुण्ठादिलोकनिरूपणम् इत्यादिकम् अत्रैव सुभिक्षम् । गीतोपदिष्टस्य "अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते" इत्युक्तस्य विवरणं श्रीपाञ्चरात्रग्रन्थेष्वेव विशदमभिहितम् । मुमुक्षोः देवतान्तरपरित्यागः भगवदेक-

समाश्रयणम्, तदर्थं तत्प्राप्त्यर्थं सर्वजनीनोपायानुष्ठानम् इत्यादिकं तु श्रीपाञ्चरात्रशास्त्रेषु इतरग्रन्थापेक्षयाऽधिकम् । एषु बहवो विषयाः श्रीवैखानसशास्त्रेष्वपि समाना इत्यपि स्थिते होतृशाखोक्तहौत्रपरिग्रहन्यायेन तत्परशास्त्रेऽस्मिन् अभ्यधिका इति तत्रादरः ।

तप्तचक्राङ्कनस्य श्रीवैखानसग्रन्थेषु स्पष्टमनुमत्यभावेऽपि वैखानसीये मरीचिग्रन्थे मुद्राधारणम् अनुशिष्टमेव । यथा-"सुदर्शनम् इति दक्षिणे हस्ते सुदर्शनमुद्रां धारयेत्, रविरिति वामे शङ्खमुद्रां धारयेत्" इति । एतेन यथा वा आनन्दतीर्थीयैः चन्दनाद्युपलिप्त-शङ्खचक्रादिधारणं अनुष्ठीयते-तद्वत् वैखानसैरपि आचारः सम्मत एव । अद्यापि क्वचित् आलयेषु कैङ्कर्यपरैः मुद्राधारणमनुष्ठीयमानं पश्याम इति वृद्धा विदामासुः । गयाक्षेत्रे विद्यमानैः ब्राह्मणैः तप्तशङ्खचक्रमुद्राया धारणं क्रियमाणं प्रत्यक्षम् अद्याप्यनुभवाः । अतः पुरातनकाले ब्राह्मणसामान्यैर्ध्रियमाणस्यास्य आचारस्य क्रमेण निदानान्तरैः ह्रासः समजनि इत्याश्रयणे न कोऽपि विमन्येत ।

श्रीपाञ्चरात्रागमानां मूलभूता एकायनशाखेव, अस्यापि शास्त्रस्य उपलभ्यमान-वेदेष्वेव मूलमुपलभ्यते । "यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । गृणन्ति सत्यकर्माणं सत्यं सत्येषु सामसु" (वचनमिदं भगवद्गुणदर्पणे भट्टपराशरपादैः 'सत्यधर्मपराक्रमः' इत्यत्रोपात्तम्) इति वचनेन वेदव्यासेन वेदविभजनात् पूर्वं मूलभूतायाः संहितायाः वाक-निषत्संज्ञया व्यवहार इति, तदनुसारिणीनां शाखानाम् अनुवाक-उपनिषत्संज्ञकत्वं च स्पष्टम् । एतदेव मूलमिति व्यपदिश्यते । भगवद्गुणदर्पणे 'मौलाः' इति असकृत् बहुत्र उपात्तो ग्रन्थः एष एवेति वृद्धाः । कृतयुगे धर्मोऽविकलः पूर्णश्चतुष्पादासीत् । क्रमेण युगपरिवृत्तिषु एकैकपादहासः-इतिवत् कृतयुगे श्रीविष्णुरेक एव देवता । तदानीं देवतान्तरगन्ध एव नासीत् । विद्यमानत्वेऽपि अद्यत्वे इव तासां देवतानां पारम्यप्रतिपादकाः ग्रन्थाः नासन् । यथा वा प्रकृतिमण्डले एव श्वेतद्वीपे देवतान्तरगन्धोऽपि न, तद्वत् । अत एवाचार्यपादैः "पक्षे कार्तयुगे निवेशितपदाः" इत्यभिहितं श्रीपाञ्चरात्ररक्षायाम् । "वेदानां व्यसनादर्वाक् प्राग्रूपं मिलितं तु यत् । तां तु वैखानसीं शाखाम्" (वैखानसविजये पु.२३) इति वचनमप्यत्रार्थे आचार्यैरिहोपात्तमवधेयम् ।

नवीनैरपि श्रीलक्ष्मीविशिष्टाद्वैतशारीरकभाष्यकारैः श्रीमद्भगवद्रामानुज-मुनिप्रभृतिभिः प्रवर्तितस्य शरणागतिसिद्धान्तस्याभ्युपगमः स्वग्रन्थेऽभीष्टः समर्थितश्च । अतोप्यस्माकं वैखानसीयोऽध्वा सुतरामुपादेयः । अत एव श्रीमन्निगमान्तगुरुभिः शरणागतिदीपिकायाम् - "त्वां पाञ्चरात्रिकनयेन पृथग्विधेन वैखानसेन च पथा नियताधिकाराः" इति श्लोके श्रीपाञ्चरात्रिक - वैखानसाध्वनिष्ठानां परमैकान्तित्वात् व्यामिश्रदेवतान्तरसंकीर्णमिश्रयाजिभ्योऽमीषां शुद्धयाजिनां वैलक्षण्यद्योतनार्थं पृथग्विधेन इति पदमुभयान्वयि मध्यमणिन्यायेन प्रायोजि । एते लोकविलक्षणाः इति प्रदर्शने नैर्भर्यम् । अस्माभिरयं विषयो विशदं व्याख्यातः शरणागतिदीपिकाद्राविडविवरणे ।

"विष्णुदेवार्चा सर्वदेवार्चा भवति" इति वैखानससूत्रम् । अभ्युदयनिःश्रेयसार्थिनां श्रीवैखानसानां "शरीरारोग्यम् अर्थांश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायिनां नित्यम् अपवर्गप्रदो हरिः" इति प्रमाणानुसारं भगवदेकनिष्ठत्वं गुणायैव भवति । "तेनैव तद्धेतुत्वे मध्ये किं तेन" इति न्यायेन साक्षात् मिश्रयाजनं कृत्वा तस्य अन्तर्यामिपर्यन्तभावनापेक्षया साक्षात् भगवद्याजनेनैवाभीष्टसिद्धिरेतैराद्दता इत्यत्र न वैमत्यम् ।

अथास्मत्सिद्धान्तनिष्ठैः श्रीपाञ्चरात्रवत् श्रीमद्वैखानसशास्त्रमपि बहुत्र प्रमाणत्वेनोपात्तमिति सप्रमाणं निरूपयामः । श्रीपाञ्चरात्ररक्षायां तृतीयाधिकारे - "श्रीवैखानसशास्त्रे पठितम्" इत्युक्त्वोपात्ताः श्लोकाः-

१) "स मस्तिष्कप्रणामः स्याद् अञ्जलिं मस्तके न्यसेत् ।
प्रणामः सम्पुटः स स्यात् हृदयेऽञ्जलिमर्पयेत् ।।

प्रह्वाङ्गः सम्पुटं कुर्यात् सा प्रह्वाङ्गनमस्क्रिया ।
पादाङ्गुलिभ्यां जानुभ्यां शिरसा चावनिं स्पृशन् ।।

बद्धाञ्जलिर्नमस्कुर्यात् स पञ्चाङ्ग उदाहृतः ।
पादौ हस्तौ प्रसार्यैव शेते भूमौ च दण्डवत् ।।

स दण्डाङ्गप्रणामः स्यात् प्रणामान् एवमाचरेत्'' इति ।

२. ''स्थूलमष्टभुजं प्रोक्तं तस्मादेतत् त्रयं यजेत्'' इति श्रीवैकुण्ठे परमात्मनोऽष्ट-भुजत्वमपि क्वचिद् दृश्यते इत्यत्र वैखानसीयानन्दाख्यसंहितावचनमुपात्तं स्तोत्रभाष्ये ।

३. आनन्दसंहितायां वैखानसीयायां ''परमात्मनः सकाशात् हिरण्मयम् अण्डम् अभवत्'' इत्यारभ्य सर्वेषाम् अण्डानाम् उपरि सनातनं वैष्णवाण्डं प्रस्तुत्य, तत्र आमोद-प्रमोद-संमोद-वैकुण्ठ - रूपलोकविशेषान् अभिधाय ''आमोदे विष्णुः, प्रमोदे महाविष्णुः, संमोदे सदाविष्णुः, वैकुण्ठे सर्वव्यापी नारायणश्चासीनः'' इत्यभिहितम् । एतदाधारीकृत्यैव श्रीमद्भिः ''नडादूर्-अम्माल्'' इति विख्यातैः श्रीवात्स्यवरदगुरुभिः प्रातरनुसन्धेय-पञ्चत्वादिपञ्चकस्तुतौ ''आमोदे भुवने प्रमोद उत संमोदे च संकर्षणं प्रद्युम्नं च तथाऽनिरुद्धमपि तान् संहारसृष्टिस्थितीः'' इत्यभिहितमिति स्पष्टम् । इयान् विशेषः- श्रीवात्स्यवरदगुरुभिः श्रीवैखानस-पाञ्चरात्रप्रतिपाद्यैक्यविवक्षया वासुदेवादिव्यूहपञ्चकानामप्यत्रैवान्तर्भावः कृत इति ।

४. आचार्यैः परिपूर्णब्रह्मानुभवाधिकारे सायुज्यशब्दार्थनिष्कर्षः कृतः । एवं सार्ष्टिता-शब्दार्थश्च । तत्र सालोक्य-सामीप्य-सारूप्य-सायुज्यरूपेण मोक्षे प्रभेदोऽभ्यधायि-

''लोकेषु विष्णोर्निवसन्ति केचित् समीपमृच्छन्ति च केचिदन्ये ।
अन्ये तु रूपं सदृशं भजन्ते, सायुज्यमन्ये, स तु मोक्ष उक्तः ।।''

इति श्लोकमुपादाय । नूनमयं श्लोकः कुत्रापि वैखानसागमे स्यादिति तर्कयामः । यतः- ''समाराधनविशेषात् चतुर्विधपदावाप्तिः - सालोक्यं सामीप्यं सारूप्यं सायुज्य-मिति । आमोदप्राप्तिः सालोक्यम् । प्रमोदप्राप्तिः -सामीप्यम् । संमोदप्राप्तिः सारूप्यम् । वैकुण्ठप्राप्तिः सायुज्यम्; तच्च नित्यानन्दं.....परज्योतिःप्रवेशनम्'' इति आनन्दसंहितायाम् अभिहितम् । एतेन सायुज्यस्यैव मुख्यमोक्षत्वमिति न मन्तव्यम्, अन्येषामपि परमपदत्वाविशेषात् । विवक्षाभेदेन चातुर्विध्यम् । मोक्षलोके एवावान्तरप्रघट्टका एते ।

तावता आनन्दतारतम्यम् आनन्दतीर्थीयाभिमतमत्र विवक्षितमिति भ्रमितव्यम्; सर्वत्रानन्दस्य तुल्यत्वात् । आनन्दमयविद्याया प्रियशिरस्त्वादिरूपितानां प्रिय-मोद प्रमोद-आनन्दानाम्, अत्रत्यलोकानां च न कोऽपि सम्बन्ध इत्यपि विभाव्यम् । स्पष्टमिदमत्रैव वैखानसविजये आचार्यैरभिहितं सावधानैरवगन्तव्यम् ।

५. श्रीवैष्णवानां 'यज्ञो वै विष्णुः' इति श्रुतिप्रतिपादितो विष्णुः परा देवता । वैखानसशास्त्रेषु इतरभगवन्नामापेक्षया विष्णुनाम्नि भूयान् आदरः । मरीचिविमानार्चनाकल्पे "पञ्चानां मूर्तीनाम् आदिमूर्तिर्विष्णुः तद्भेदाः चतस्रो मूर्तयः- पुरुषसत्याच्युतानिरुद्धाः । ताः धर्मज्ञानैश्वर्यवैराग्यैः पादात् अर्धपादात् त्रिपादात् केवलाद् भिद्यन्ते प्रातिलोम्येन" इत्यभिहितम् । अत एव एते वैखानसाः श्रीवैष्णवेष्वेव आदिवैष्णवाः इति प्रशस्यन्ते । तदनु ये विष्णुपारम्यवादिनः ते सर्वेऽपि वैष्णवत्वेन मानिताः । "यज्वभिर्यज्ञपुरुषो वासुदेवश्च सात्त्वतैः । वेदान्तवादिभिर्विष्णुः प्रोच्यते, तं नतोऽस्म्यहम्" (विष्णुपुराणे ५-१७) इति पराशरसूक्तिरिहानुसन्धेया । एवं "चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु" इति कपर्दिकारिकाऽपि ।

६. श्रियो विभुत्वं, भगवत इव हृदयायतने तस्या अपि अन्तर्यामिनीत्वेनावस्थानं च ज्योतिरधिकरणश्रुतप्रकाशिकायां स्पष्टमभिहितम् । तत्रत्यानि वाक्यान्येवम्-

".....'इन्द्रं निचिक्युः परमे व्योमन्", "इन्द्रो मायाभिः" इत्यादिषु परमपुरुषस्य इन्द्रशब्दवाच्यत्वं च सिद्धम् । वामाक्षिस्था तत्पत्नी साक्षाल्लक्ष्मीरेव, इन्द्रशब्दवाच्यस्य पत्नीत्वेन प्रतीतेः । तैत्तिरीयके च "राडसि बृहती श्रीरसि इन्द्रपत्नी धर्मपत्नी" इति इन्द्रपत्न्याः श्रीशब्दवाच्यत्वावगमात् । किञ्च हृदयगुहायाम् अवस्थानम् अनयोरिह श्रूयते - "तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशः" इति ।"इति ।

अनेन श्रुतप्रकाशिकावाक्यसमुदायेन भगवत इव श्रियोऽपि हृदय-गुहावस्थाननिरूपणात्, 'य आत्मानमन्तरो यमयति' इत्युक्तात्मनियमनमपि श्रिय इत्यभ्युपेतमिति ज्ञायते । अन्तःस्थितिश्च नियमनार्थमेव । व्यापन-भरण-नियमनादीनि

विभुत्वावेदकानि । स्पष्टमिदं भाष्यादिषु । अतः श्रीरपि विभुः= विम्वी इति सिद्धान्तः । अयं विषयो वैखानसशास्त्रे आनन्दसंहितायां ज्ञानकाण्डे च स्पष्टमभिहितम् - "सा देवी श्रीरिति प्रोक्ता । तमनयैव सह देवेशमर्चयन्ति परमर्षयः । सा प्रकृतिः । तदभिन्नाः सर्वाः स्त्रियः । पुरुषास्तदभिन्नाः । ताभ्यां स्थितिः । तस्मात् सहैवार्चयेत् । विष्णोर्विभूतिः श्रीर्नित्या" इत्यादि । एवंरीत्याऽपि विशिष्टाद्वैतिनां परमोपादेया वैखानसग्रन्थाः । माधवः (७३) इति नाम्नो व्याख्यानावसरे अत्रोपात्तानि वैखानसग्रन्थस्थानि वाक्यानि पुराणवाक्यप्रदर्शनपुरस्सरं भट्टपराशरपादैः विवृतानि- "तच्छक्तिर्दुर्जयाऽभीमा विष्णुशक्तिरिति स्मृता । सर्वभूतहृदब्जस्था नानारूपधरा परा।...ज्ञानादिषाड्गुण्यमयी या प्रोक्ता प्रकृतिः परा ।....जगच्चराचरमिदं सर्वं व्याप्य व्यवस्थिता....सर्वशक्त्यात्मिका चैव विश्वं व्याप्य व्यवस्थिता" इति । "तदभिन्नाः सर्वाः स्त्रियः । पुरुषास्तदभिन्नाः" इत्यत्र "देवतिर्यङ्मनुष्येषु पुंनामा भगवान् हरिः । स्त्रीनाम्नी लक्ष्मीः मैत्रेय! नानयोर्विद्यते परम्" इति श्रीपराशरोक्तिरनुसन्धेया । "ताभ्यां स्थितिः" इत्येतत् सृष्ट्यादेरप्युपलक्षणम् । यद्वा सर्वत्रानयोः स्थितिरनेनोच्यते । एतत् सर्वमभिप्रेत्यैवाचार्यैः "मानातीतप्रथितविभवाम्" इति श्रियो विभुत्वमभिहितम् ।

७. विशिष्टाद्वैतिभिः जीवपरमात्मनोः जगतः परमात्मनश्च शरीरशरीरिभावः विशदं प्रतिपादितः । प्रधानप्रतितन्त्रभूतश्चायं विषयः । अत्रापि वैखानसशास्त्रमनुकूलमिति तद्ग्रन्थानुसन्धायिनां स्पष्टम् । एवं सुबहु वर्तते ।

अत्र वैखानसविजयेऽस्मदाचार्यैः ईदृशा बहवो विषयाः सप्रमाणं निरूपिताः विदुषां मोदावहाः । क्वचित् तस्य विवरणमावश्यकमिति विचिन्त्य आचार्योक्तिव्याख्याव्याजेन एतावदस्माभिर्विस्तृतम् । प्रीयतां श्रीविष्णुः, प्रीयन्तां श्रीवैष्णवाः ।।

चेन्नै

१.८.२००२

*****

श्रीः

श्रीनिवासपरब्रह्मणे नमः ।

वैखानसविजयः

महाविद्वद्भिः श्री उत्तमूर् वीरराघवाचार्यैः

विरचितः

स्मितफुल्लगण्डललितोर्ध्वपुण्ड्रधृन्मकुटोपशोभिमुखचन्द्रमद्भुतम् ।
विखनोर्चनोल्बणसमृद्धि धाम तद् वृषशैलधाम कुलदैवतं श्रये ।।१।।

स्वोपदिष्टनिखिलश्रुतिसारव्याकृतौ भगवतैव नियुक्तः ।
कल्पसूत्रकृतये विखनस्त्वं प्राप यो विधिरसौ हि गुरूद्धः ।।२।।

पुरुषार्थेषु मोक्षः परम इति तावदास्तिकाः सर्वे संप्रतिपद्यन्ते । कोऽसौ मोक्ष इत्यत्र सर्वानिष्टनिवृत्तिमात्रेण तार्किकादयः संतृप्ताः । अतिशयितमानन्दानुभवमप्यागमान्त-निष्णाताः अभ्युपयन्ति । सोऽयं मोक्षः तत्त्वयाथात्म्यनिर्णयानुरूपं निरूपयितव्यो भवतीति तत्परिशीलने क्रियमाणे, इदमनुसन्धेयं भवति - निखिल निगमव्यसन- पुराणेतिहासप्रणयन-ब्रह्मसूत्रनिर्माणनिरूढवैभवेन भगवता कृष्णद्वैपायनेन, वसिष्ठपुलस्त्यवर-प्रदानलब्धदेवतापारमार्थ्यस्य श्रीविष्णुपुराणं प्रणीतवतः पराशरस्य परमर्षेः पुत्रेण,

"तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः ।
तत्त्वमेको महायोगी हरिर्नारायणः परः ॥"

इति श्रीमन्नारायणपारम्यं निरणायि । एवमपि केचिन्मोमुह्येरन्निति भुजमुद्धृत्य च तेन समघोषि

"सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
वेदात् शास्त्रं परं नास्ति न दैवं केशवात् परम् ॥" इति ।

जीवकृत्यं दर्शयता च तेन-

"आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ।।"

इति सदा तद्ध्यानं कर्तव्यं भारत एव प्रत्यबोधि । तथा आह्निकं शिक्षयता तेन धर्मकाण्डे देवार्चनं विवक्षता,

"न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम् ।।"

इति भगवदाराधनमेव वैदिकत्वेन व्युदपादि । मोक्षे च-

"बद्धाञ्जलिपुटा हृष्टा नम इत्येव वादिनः ।
मुक्तानां लक्षणं ह्येतत् यत् श्वेतद्वीपवासिनाम् ।।"

इति श्वेतद्वीपे भक्तपरिस्थितिप्रदर्शनापदेशेन भगवन्तं प्रति बद्धाञ्जलिपुटतयाऽवस्थानमेव कृत्यमित्यदर्शि । तदेवं ध्यानसेवनयोरुक्तयोर्बलेनैव भगवतो जीवाः नित्यशेषाः दासाः कैङ्कर्यधनिन इति सिद्धे, निरस्तनिखिलानिष्टः सर्वदेश-सर्वकालसर्वावस्थोचितसर्वविधकैङ्कर्यरूपेण परिवहन् परिपूर्णभगवदनुभव एव मोक्ष इति प्रतिपत्तव्यम् । स हि शेषो नाम, यः शेषिप्रयोजननिर्वर्तनेनैव स्वात्मानं लभते । इदमभिप्रेत्याभिहितं श्रीभगवद्यामुनमुनिभिः-

"कदाऽहमैकान्तिकनित्यकिङ्करः
प्रहर्षयिष्यामि सनाथजीवितः" इति ।

नित्यशेषत्वाध्यवसायविरोधेन क्षणमेकमपि स्वार्थत्वबुद्धिः क्वचिदपि न साम्प्रतमिति च तैरेव निरटङ्कि ।

"न देहं, न प्राणान्, न च सुखमशेषाभिलषितं,
न चाऽऽत्मानं, नान्यत् किमपि तव शेषत्वविभवात् ।
बहिर्भूतं नाथ क्षणमपि सहे, यातु शतधा
विनाशं तत्, सत्यं मधुमथन विज्ञापनमिदम् ।।" इति ।

इदमेवाभिसन्धाय श्रुतिः 'य आत्मनि तिष्ठन्.....यस्यात्मा शरीरम्' इति जीवात्मनां परमात्मशरीरत्वं श्रावयति । न हि शरीरं जातु स्वार्थं भवितुमर्हति; किं नाम; आत्मार्थम् । यस्यैष विवेकः स्वात्मा तस्य शरीरमिति, स नूनं स्वात्मभूतभगवन्मुखोल्लासहेतोरन्यत्र न व्याप्रियेत । स्वार्थं फलान्तरकामनायां हि शेषत्वाध्यवसायोऽयं भज्येत । सर्वमिदमभिप्रेत्य जैमिनिः, "शेषः परार्थत्वात्" इति सूत्रं प्राणैषीत् । पारार्थ्यमेव शेषत्वम् । "फलवत्सन्निधौ अफलं तदङ्गम्" इति वदद्भिश्च मीमांसकैः अङ्गस्याङ्गिफलादन्यत् फलं प्रत्यषेधि ।

स्वार्थमिति प्रवृत्तौ शेषत्वभङ्ग इत्येव श्रीभगवता सात्त्विकत्यागपुरस्सरं कर्माण्यनुष्ठापयता, "तत् कुरुष्व मदर्पणम्" इत्यगायि । यद्यपि क्षुत्पिपासाशमनमपि किञ्चिद् विवेकिभिरपि क्रियते, अथापि तदपि शमनं तदर्थमित्यध्यवस्यतां न स्वार्थत्वबुद्धेरवसर इति विवेक्तव्यम् । लोकसिद्धकार्यकारणभावानां पदार्थानामुपादानं हि लौकिकं फलं जनयितुमेव, अथापि तत् फलमपि परमात्मार्थमित्येव भाव्यम् । अवर्जनीयफलविषये एवमध्यवसायेऽपि अन्यत्र संकल्पसम्पाद्यफलविषये सर्वथैवोदासितव्यम् । मुमुक्षाऽपि जीवस्येदृशशेषत्वाध्यवसायभङ्गप्रसङ्गं प्रकृतिमण्डलेऽभिलक्ष्य तत्परिहारायैवेति विभाव्यम् ।

तदेवं भगवत्प्रीणनं कर्मैव जीवस्य स्वरूपप्राप्तमित्युक्तं भवति । एवञ्च विवेकिभिः स्वार्थं किञ्चित्कर्माचरणमिव देवतान्तरार्थं किञ्चिदाचरणमपि भगवच्छेषत्वभङ्गभियैव त्याज्यं भवति । अत एव महाभारते श्रीनारायणीये यज्ञाग्रहराध्याये देवतान्तरयजनं परमैकान्तिनां पर्युदस्तम् । एतावदविवेचयन्तस्तु, वैष्णवानां देवतान्तरसेवनविद्वेषो न साम्प्रतमिति मुधा दोषमारोपयन्ति । एवं हि संमन्यमाने लौकिकप्रभुसेवादिकमपि श्लाघनीयं स्यात् । 'सेवा श्ववृत्तिराख्याता' इति तन्निषेधोऽपि दुर्लभराजसेवाभाग्यैः कल्पित इति कल्प्येत । आत्मस्वरूपविरोधाविरोधपर्यालोचने पुनः देवतान्तरयजनमप्यनुचितमिति सप्रमाणं स्थास्यति । यदा तु भगवतैव विशिष्य क्वचित् कश्चित् प्रेर्येत, स कामं

तच्छेषत्वसंरक्षणायैव तत् कर्तुमर्हति । अन्यत्र तु स्वरूपविरुद्धे प्रवृत्तिरसाम्प्रतम् । अ
एव नित्यनैमित्तिकेष्ववर्जनीयं देवतान्तरानुसन्धानमिति महान्तो मन्वते ।

तत् सिद्धं भगवदैकान्त्यमधिगम्य तच्छेषत्वानुरूपवृत्तिपरेणैव सर्वेण मोक्ष इ
बन्धेऽपि विवेकिना भाव्यमिति । सोऽयं सर्ववैष्णवसमादरणीयः सिद्धान्तः ।

भगवत्प्रीणनश्च कर्म किमिति भगवतः शास्त्रैकसमधिगम्यतया तत्प्रीत्यप्रीति
विज्ञानमपि तदेकमूलमिति तत्रापि शास्त्रमेव नश्चक्षुः । परमे तु पदे परंज्योतिरुपसम्प
स्वेन रूपेणाभिनिष्पन्नतया तस्य सर्वमाशयं साक्षात्कुर्वन्तः, 'स तत्र पर्येति', 'कामान्न
कामरूप्यनुसञ्चरन्', 'स एकधा भवति त्रिधा भवति पञ्चधा' इत्याद्युपनिषदुद्घोषितरीत्य
सत्यकामाः सत्यसंकल्पाः तत्संकल्पानुकूलमेव सर्वं कैङ्कर्यरूपेण चरितुं पारयन्ति ।
त्विह । अतः शास्त्रमादर्तव्यम् । अन्यथा हि स्वाराज्यक्षुब्धहृदया इ
स्वच्छन्दानुरोधेनोच्चावचं प्रवर्तमानाः वासनावशादीश्वरप्रद्वेषमात्रं जहतोऽपि
परमभ्युपयन्तोऽपि ब्रह्महत्यासुरापानाद्यपि तत्संप्रीणनं मन्वीरन् ।

ननु-सत्यं शास्त्रमेव चक्षुः । तत एव 'ध्येयो नारायणः सदा' इति प्रागुक्तं ध्यानमे
तत् स्यादिति चेत्-स्यान्नाम । यदि तदेव क्षणमेकमप्यविहाय अनुवर्तयितुं पार्यते
क्षुत्पिपासाकुलितस्य हि न तच्छमनमन्तरेण ध्याने प्रवृत्तिः । ध्यानमिति किम्? "बुभुक्षि
न प्रति भाति किञ्चित्" । तच्छामकं च भोजनं शुद्धेनान्नेन निर्वर्तनीयम् । 'आहारशु
सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति हि स्मृतिः । अपरथा 'यदर्थमयमारम्भ
तत्कार्यमवसादितं' स्यात् । ध्यानमेव न निष्पद्येत ।

"यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात्।।"

इति च गीतम् । पञ्चमहायज्ञनिर्वर्तनं च न्यायार्जितैरेव द्रव्यैः । तथा
'सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु' इति वचनात् तत् उपासितसन्ध्यस्यैव । तदुपास
च 'स्नानमूलाः क्रियाः सर्वाः' इति स्नाने शास्त्रप्रकारेणानुष्ठिते आयतते । स्नानं

शौचाद्यनन्तरम् । तदेतावत्सापेक्षमेवं ध्यानम् । ध्यानसम्पन्नस्यापि तदनुवर्तनमेवं सत्येव भवतीत्युक्तम् । तदुपक्रमश्च यमनियमासनप्राणायामप्रत्याहारसापेक्षो न प्रथमत एव संपद्यते । अन्यथा खल्वद्यत्वे सर्वेऽपि हेलया भक्तियोगमनुतिष्ठेयुरास्तिकाः । एकोपि हि सुदुर्लभः सांप्रतम् ।

तस्मात् वैदिकलौकिककर्मणां बहूनामवर्जनीयतया, अपेक्षिततया च तदर्थं कालं विहाय, अन्यदा सर्वदा ध्येयो नारायण इत्येव निगमनीयं भवति । अथवा सदा ध्येय इति वाक्यमेवमर्थं भवितुमर्हति । सर्वमपि कर्म क्रियमाणं 'ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना' इति गीतानुसारेण ब्रह्मज्ञानगर्भमेव क्रियते इति । सर्वकालानुस्यूततच्चिन्तनमयत्वात् कर्मणां ध्यानमेव सर्वदा क्रियमाणं भवति । वर्णितश्चैवमेव श्रीमति रहस्यत्रयसारे नित्यकर्मानुष्ठानावश्यकत्वं निरूपयद्भिः श्रीमद्भिर्देशिकचरणैः । एवं कर्मणां ज्ञानमयत्वं मनसिकृत्यैव भगवत्प्रतिष्ठार्चनादिमात्र-प्रतिपादकस्य स्वग्रन्थस्य 'ज्ञानकाण्डः' इति नाम विखनोमुनिशिष्यः काश्यपः कल्पया-मास । 'कश्यपः पश्यको भवति' इति श्रुत्युक्तरीत्या सर्वदर्शी हि महर्षिः काश्यपः । कश्यपकाश्यपयोर्नात्यन्तं भेदः । स ज्ञानप्राधान्यं कथं त्यजेत् । ध्यानमिदं सर्वदा कर्तुमशक्यमित्यानन्दसंहितायां मरीचिरप्याह, "सदा ध्यातुमशक्यत्वात्" इति । तदेवं ध्यानं विधीयमानं तदपेक्षितकर्मसाहचर्येणैव विधीयत इति तद्बाह्यकर्मत्यागमात्रं ततः सिद्धयेत् । तेन देवतान्तराराधनकर्माणि, अनुपयुक्तानि च लौकिकानि सर्वाणि त्याज्यानि भवन्ति; न तु नित्यनैमित्तिकानि । यो हि युक्तः बहुतिथं कालं ध्याने-नैवातिवाहयितुमलम्भविष्णुः, तस्य बाह्यकर्मस्फूर्त्यप्रसक्तेरननुष्ठानं प्राप्तमिष्यत एव । योगात् व्युत्थितास्तु न त्यक्तुमर्हन्ति ।

'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि' इति चावर्जनीयं कर्मानुष्ठानम् । इयान् विशेषः- कर्मयोगन्यायेन अविद्वान् कस्याराधनमित्यजानानः कथमप्याचरेत् । विद्वांस्तु अविद्वदाचरणसमानबाह्याचरणोऽपि ब्रह्माराधनत्वबुद्ध्यैव समाचरतीति ।

अर्थज्ञानविधुरविहितं वेदाध्ययनमिवान्तरात्माराधनरूपतामजानतोऽनुष्ठानमपि श्रेयस्करतां न सर्वात्मना जहाति । पर्वक्रमेण परमं फलं प्रसुवीत ।

एवमभिज्ञानभिज्ञसर्वपुरुषापेक्षितत्वात् सर्वेऽपि महर्षयो वर्णाश्रमधर्म-निरूपणैदम्पर्यमबिभरुः । अभिसन्धिस्तु सर्वेषाम्, "वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते, पन्थाः नान्यस्तत्तोषकारकः" इति विष्णुपुराणे, "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" इति गीतायाश्च दर्शिते भगवत्प्रीणन एव । अत एव, 'मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते' इति स्मर्तृषु ज्येष्ठतयेव श्रेष्ठतयाऽपि परिगणितो मनुः स्वोपदेक्ष्यमाणानां वर्णाश्रमधर्माणां भगवदाराधनतामादौ शिक्षयितुम्, 'आसीदिदं तमोभूतम्', "ततः स्वयम्भूर्भगवान्' इति तस्य स्रष्टृत्वादिकं वर्णयन्नेव शास्त्रमुपाक्रंस्त । काम्यकर्मणामपि वस्तुतो न फलार्थमेवोपदेशः, किन्तु भगवद्विषयवेदनसंवर्धनार्थम् । यतः श्रूयते 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति, प्रजानां प्रारम्भतो भगवत्परत्वस्य विरहात् फलान्तरवैयग्र्याच्च तैरेव कर्मभिस्तदपेक्षितानि फलानि निष्पाद्य तेषु कर्मसु श्रद्धामाधाय तत एव स्ववेदनमपि पश्चात् साधयितुमनसा भगवता तान्युपदिश्यन्त इति तत्त्वम् । तथा च स्मर्यते, 'प्रत्ययार्थश्च मोक्षस्य सिद्धयः संप्रकीर्तिताः' इति । काम्यकर्मणामप्यैदमर्थ्ये एवमवगम्यमाने, अकरणे अपूर्वं प्रत्यवायं, करणे पापक्षयञ्च प्रसुवतां नित्यकर्मणां परमपुरुषवेदनार्थमुपदेश इत्यत्र न विशयावकाशलेशोऽपि । मनोवाक्कायाख्यानि मुख्यानि त्रीणि करणानि कल्पयतो भगवतश्च मनोमात्रे स्वार्थताक्लृप्तिर्न भवितुमर्हतीति हेतोरपि सर्वस्य तादर्थ्यसिद्धिः ।

तदेवं ध्यानं कर्मेति द्विविधे भगवत्प्रीणने, कर्म किं स्नानसन्ध्योपासनाग्नि-होत्रादिरूपमेव - आहो अन्यादृशमपीति विचारे, अन्यादृशमप्यस्तीति गीतयाऽपि ज्ञायत इति विद्मः । तत्र हि द्वादशे-

"अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ।।"

इति ध्याने शक्तिविकलस्य सार्वकालिकमालम्बनसंशीलनमावश्यकमित्यभिधाय तत्राप्यसामर्थ्ये ततोऽन्यदनुष्ठेयमदर्शि-

"अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥" इति ।

अत्रोक्तं कर्माचरणं तावत् न नित्यनैमित्तिकानुष्ठानमात्रम्; तस्य पूर्वोक्ताभ्यासकाले ध्यानकालेऽपि स्थितत्वादविशेषात् । नापि कर्मयोगाचरणम्; एतत्कर्माचरणस्याप्याशक्यत्वे कर्मयोगश्चरणीयः इति,

"अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥"

इत्यनेन समनन्तरमेव ज्ञाप्यमानत्वात् । अत्र 'मद्योगम्' इति पदबलात् पूर्वोक्तं कर्म तद्योगोपयोगि कर्म, सर्वकर्मफलत्यागरूपकर्मयोगस्तु जीवात्मयोगोपयोगि कर्मेति वैलक्षण्यमिति वेदितं भवति । तदत्र मद्योगपदवत् मत्कर्मेति पदमपि स्वरसतः साक्षाद्भगवदर्थं कर्मविशेषं विलक्षणमाहेत्यवसीयते । एतदनुसारेण 'सर्वकर्म' इति पदमपि देवतान्तरद्वारकस्यापि कर्मणः यज्ञादेः सात्त्विकत्यागविषयतां दर्शयति । सन्ध्योपासनाग्निहोत्रदर्शपूर्णमासादीनि हि कर्माणि नानादेवानुसन्धानकर्बुराणि, अथापि भगवदर्पणधियैवानुष्ठीयन्ते । एवञ्च मत्कर्मेति पदं साक्षात् भगवद्गोचरं किमप्यन्तरङ्गं कर्मविशेषमाहेति आर्जवेन प्रतिपत्तव्यम् । एतद्गीताश्लोकार्थानुवादकं वचनमत्र तात्पर्यचन्द्रिकायामुपात्तमप्यवधानमर्हति–

"तत्र चित्तं समावेष्टुं न शक्नोति भवान् यदि ।
तदभ्यासपरः तस्मिन् कुरु योगं दिवानिशम् ॥

तत्राप्यसामर्थ्यवतः क्रियायोगो महात्मनः ।
ब्रह्मणा यः समाख्यातः तत्परः सततं भव ॥

करोषि यानि कर्माणि देवदेव जगत्पतौ ।
समर्पयस्व भद्रं ते ततः कर्म प्रहास्यसि ॥

प्रधानं.कारणं योगो विमुक्तेर्दितिजेश्वर ।
क्रियायोगश्च योगस्य परमं तस्य साधनम् ॥'' इति ।

अत्र 'ब्रह्मण' इति पदेन विखनसो विवक्षा युज्यते, 'क्रियायोग' शब्दश्च समूर्तार्चने सुप्रसिद्धः । श्रीभागवते च (११) सप्तदशाद्यध्यायतो वर्णाश्रमधर्माणामुपदेशं लब्धवतैवोद्धवेन पुनः,

''क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो''

इति (२७ अध्याये) प्रश्नः कृतः । भगवांश्च विस्तरेण वैदिक – तान्त्रिक– मिश्रात्मना त्रिविधं समर्चनमुपादिशन् निगमयति–

'प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥

मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति ।
भक्तियोगं स लभते एवं यः पूजयेत माम् ॥' इति ।

भक्तियोगस्य साक्षान्मोक्षसाधनत्वम्, आलयप्रतिष्ठापूजादिविधानात् भक्तियोगसिद्धिश्चात्र स्पष्टमुच्यते । अतो गीतायां भक्तियोगकामं प्रति उपदिश्यमानं मत्कर्मेति पदनिर्दिष्टं निरुक्तक्रियायोगात्मकमेव भवितुमर्हति ।

सर्वमिदमभिप्रेत्य च तत्र श्रीभगवद्रामानुजमुनिभिरभाषि, ''मदीयानि कर्माणि आलयनिर्माण-उद्यानकरण - प्रदीपारोपण - मार्जनाभ्युक्षणोपलेपनपुष्पाहरण - पूजाप्रवर्तन-नामसंकीर्तन - प्रदक्षिणस्तुतिनमस्कारादीनि'' इति । श्रीभागवते च (११)–

"मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम् ।
परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम् ॥

गीततान्डववादित्रगोष्टीभिर्मद्गृहोत्सवः ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥

मदर्चास्थापने श्रद्धा स्वतः संहृत्य चोद्यमः ।
उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि ॥

संमार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ।
गृहशुश्रूषणं मह्यं दासवत् यदमायया ॥"

इत्यादिना स्पष्टमुपदिष्टमिदं सर्वम्–

'स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते' इति ज्ञानांशस्य मुख्यत्वात् तद्घटनया नेरुच्यमाना भक्तिरपि अर्चन-स्तवन-नमनादिरूपेण परिवहन्त्येव मोक्षसाधनमिति र्शयितुमेव भक्तिस्वरूपनिष्कर्षके नवमेऽध्याये, 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु' त्यत्र 'मद्याजी'ति पदस्य अर्चाशास्त्रप्रपञ्चितऔपचारिकसांस्पर्शिकाभ्यवहारिक-सांदृष्टिकसकलभोगप्रदानरूपयागपरत्वमेवाभाषि । औपचारिकः = नीराजनादिः; सांस्पर्शिकः= स्रक्चन्दनादिः; आभ्यवहारिकः =नैवेद्यरूपः; सांदृष्टिकः =दीपादिः । वेदार्थसंग्रहेऽपि "जीवपरमात्मयाथात्म्यज्ञानपूर्वक - वर्णाश्रमधर्मेतिकर्तव्यताक - परमपुरुषचरणयुगलध्यानार्चनप्रणामादिः अत्यर्थप्रियः तत्प्राप्तिफलः" इति वर्णाश्रमधर्माणामितिकर्तव्यतात्वं अर्चनादेरुपायकोटिप्रवेशश्चादर्शि ।

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥"

इति सर्वस्य भक्तित्वं स्मर्यते स्नेहपूर्वकव्यापारसामान्यं भक्तिरित्याशयेन । 'भज

सेवायाम्' इति च धातुः । एवञ्चार्चनं साक्षान्मोक्षसाधनमित्येतदुपपन्नतमम् अर्चनादिपरिवाहविशिष्टं ध्यानं मुक्त्युपाय इति तु निष्कर्षः । अर्चनादिकं पूर्वं क्रियमाणं ध्यानान्तरङ्गसाधनम् । ध्यानानन्तरमवशात् भवत् तदेव परिवाहभूतमिति च भाव्यम् तथा–

"पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतं अश्नामि प्रयतात्मनः ॥"

इति गीताश्लोकोऽपि मूर्त्यर्चनमेव मनसिकृत्य प्रवृत्तः । न हि विभवावतारे कादाचित्कस्य प्रदानस्यैतदर्थत्वं प्रकरणे स्वरसम् । न च निष्कले पत्रपुष्पादेर्दीयमानस्य धारणादिरूपः समुचितः सम्बन्धः सम्भाव्यते । 'अश्नामी'ति पदमपि गलादिव्यापारवाचि मूर्तिं भावयति न शुद्धपरमात्मस्वरूपम् ।

"याः क्रियाः सम्प्रयुक्ताः स्युरेकान्तगतबुद्धिभिः ।
ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥"

इति भारतवचनमपि मूर्त्या सहितस्याराध्यत्वं दर्शयति । व्यास एव स्वकीये धर्मकाण्डे आह्निकमुपदिशन् मध्ये देवार्चनप्रस्तावे, "न विष्ण्वाराधानात् पुण्यं विद्यते कर्म वैदिकम्" इति अर्चाराधनस्य प्राधान्यमावश्यकत्वञ्च प्रतिबोधयति ।

किञ्च, गृह्यश्रौतधर्मग्रन्थेषु चत्वारिंशता संस्कारैः संस्कृतत्वं पुंसामावश्यकमित्युच्यते । ते च संस्काराः निषेकादयः, पाकयज्ञाः, हविर्यज्ञाश्च सर्वे स्मार्ताः श्रौताश्च । एषां संस्कारशब्देन व्याहारः कस्मात्? संस्कारो हि नाम कार्यान्तरयोग्यताकरणम् । संस्कृतस्य चोत्तरत्र विनियोगोऽपेक्ष्यते; यथा 'व्रीहीन् प्रोक्षति' इत्याद्युक्तप्रोक्षणादिसंस्कारभाजां व्रीह्यादीनां पुरोडाशादिद्वारा यागे विनियोगः । प्रतिपत्तिकर्म परं विनियुक्तसंस्कारः स्वीक्रियते; न तत्रोपर्युपयोगप्रसक्तिः । न चेमे चत्वारिंशदपि संस्काराः पूर्वमन्यत्र यत्र क्वापि विनियुक्तस्य पुरुषस्य संस्कारा भवन्ति; न चैषां प्रतिपत्तित्वप्रसक्तिलेशोऽपि । तदत्रैवं संस्कृतस्योत्तरत्र विनियोगापेक्षा ध्रुवा । तत् कुत्रेति चिन्तायां 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु'

इत्युक्तेषु भगवत्प्राप्त्यर्थेषु करणत्रयकार्येष्वविशेषात् विनियोग इति निश्चीयते । अविद्यान्तरे परिभ्रमणमेव परमभोग्यं मन्वानाः काममन्धेनैव नीयमाना अन्धा इव क्षुद्रस्वर्गादिपतनापादकेषु कर्मजालेष्वात्मानं विनियोजयन्तु; किं तेन?

'भक्त्या भगवन्तं नारायणमर्चयेत्; तद् विष्णोः परमं पदं गच्छति' इति भक्तेरङ्गत्वमर्चनस्य प्राधान्यश्चोच्यत इत्यप्याहुः । कर्मयोगस्येव ज्ञानमयत्वात् ज्ञानान्मोक्ष इति वादोपि संगच्छत इति । निक्षेपरक्षायां कृतः 'नान्यः पन्था' इत्येतद्विचारोऽत्रोप-युज्यते ।

अतो भगवदुपासनवत् अर्चनस्यापि वर्णाश्रमधर्मापेक्षया प्राधान्यं उपासनतौल्यश्च सिद्धम् । पूर्वोक्तविधया परमपदे साक्षाद्दृष्टपरमपुरुषदिव्यमङ्गलविग्रहविषयविविधकैङ्कर्य-साधर्म्यसमीक्षायां तु तत्र नित्यमुक्तानामिव अत्र बद्धानां परमोत्साहेन प्रवर्तमानानां भगवदर्चनादिकं तथैव प्राधान्यं फलकोटिनिवेशादश्नुत इति निश्चेतव्यम् ।

एवं प्रधानभूतत्वादेवास्य भक्तिसहभूतस्य भक्तिरूपस्य च प्राग्दशायामप्यनुष्ठेयत्वात्, कर्मयोगानुष्ठानपरैरादरणीयासु कर्मयोगविधासु यथायथं गृह्यमाणासु अन्यसर्वापेक्षया भगवदर्चनस्यैव प्रथमनिर्देशं रोचयामास भगवान्, "दैवमेवापरे यज्ञं योगिनः पर्युपासते" इति । कथं तर्हि धर्मग्रन्थप्रणेतारो यथावदिदं श्रीमन्नारायणार्चनं न न्यरूपयन्निति चेत्-चरित-क्रिया-ज्ञान-योगरूपेषु चतुर्षु चरितनिरूपणैदंपर्यादिति गृह्य-ताम् । ऐहिकामुष्मिकनानाफलव्यापृतलोकसाधारण्येन कर्मकाण्डार्थनिरूपणनिष्णाता हि ते निगमशिखरकुहरनिगूढनिष्कृष्टतत्त्वानुष्ठानांशवैशद्यं न स्वकर्तव्यं मेनिरे । अथापि निरीश्वरमीमांसकादिकोटिनिवेशाद् बिभ्यतः स्वप्रतिपाद्यो धर्मः सर्वः सर्वेश्वराराधनरूप इति परं व्युत्पादयितुं तस्य जगत्कारणत्वादि स्वयमदीदृशन् । अत एव मनुः प्रथमतो भगवत्प्रस्तावमात्रेणानुपरम्य शास्त्रान्ते प्राधान्येन योगं निर्दिशति । याज्ञवल्क्यश्चाऽऽदावेव, 'अयं तु परमो धर्मो यत् योगेनात्मदर्शनम्' इति स्पष्टमाह । मध्ये च, 'स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्चयेत् तथा' इति अर्चनं सामान्येनाह । तथा प्रायश्चित्ताध्याये शुद्धिहेतुपरिगणनावसरे, 'क्षेत्रज्ञस्येश्वरज्ञानात् विशुद्धिः परमा मता' इति स्वस्य शास्त्रदर्शितमीश्वरं यो जानाति,

तस्य तदनुग्रहेण सर्वकर्मनिर्मोकरूपा महाशुद्धिर्भवतीति दर्शयति । एवमन्यत्र । एवं श्रौतस्मार्तगृह्यधर्मप्रयोगशिक्षकाः कल्पसूत्रकाराः स्वयं सम्यगभिमतदेवार्चना अपि कर्मकाण्डार्थमात्रकथनवैयग्र्यात् तत्प्रपञ्चनं नादद्रिरे । वैदिकं देवतार्चनमपि यथावदवश्यमुपदेष्टव्यमिति श्रद्धधानो भगवान् विखना एव यथावत् सर्वं स्वसूत्रे निरूपयामासेति, औपनिषदार्थरहितकेवलकर्मकाण्डायमान-संहितान्तरतो विलक्षणा ईशोपनिषद्घटिता शुक्लयजुःसंहितेव, सूत्रेषु वैखानसमेव विजयते ।

अन्यथा हि ग्रन्थकारोपरि बहुविधानामुत्प्रेक्षाणामवसर आपद्यते, सौरशैव-वैष्णवादिमतभेदात् देवतार्चनप्रणाली भिद्यत इति तत्प्रपञ्चने ते उदासतेति वा, तेषां मतनिष्कर्षो नास्तीति दूषणं परिहर्तुं अवश्यं तैरभिमतं प्रदर्शयितव्यमासीत्-अथापि त्यक्तं बतेति वा, तत्तद्देवताभक्तसर्वलोकसंमान्यत्त्वाय सर्वसंग्राह्यत्वं स्वग्रन्थस्य भज्येतेति भियैव ते त्यक्तवन्त इति वा, देवार्चनायाः देशकालदशानुरोधेन संक्षेपविस्तरार्हतया तत्र प्रयोगेयत्ताशिक्षणं न साम्प्रतमिति तदुपेक्षांश्चक्रिरे इति वा, सर्वसूत्रकारैकरस्याय पृथक् तत्प्रणयनं युक्तमिति प्रतीक्षाञ्चक्रिर इति वा, पाञ्चरात्रगतस्य तान्त्रिकस्याप्यादरणीयत्वात् तस्य वैदिकैकपरसूत्रमध्ये निबन्धनस्यानुचितत्वात् वैदिकस्य वैखानसस्य परं निरूपणे पक्षपातः कृतः स्यादित्यमंसतेति वा विविधा भवन्त्युल्लेखाः । किं स्यात् तैरालोचितमिति हि विचारसागरे संप्लवन्ते सर्वेऽप्यास्तिकाः । विलक्षणस्तु विखनाः वैदिकमेव सर्वं समादरणीयमिति दृढाभिसन्धिः देवार्चनानुक्तौ मुख्यांशात् च्यावितो भवेयुः प्रजा इति भीतः, "अस्मत्सूत्रानुरोधिनः अनिष्कृष्टपरदेवताः अव्यवस्थितमतयो मा भूवन्, विष्णु-पारम्यमवधार्य परमनिःश्रेयसप्राप्त्यर्थसमाचारपराः प्रथन्ताम्" इति परमकारुणिको भवन् विष्णुप्रतिष्ठार्चनादिकमपि चत्वारिंशत्संस्कारनिरूपणार्थनिर्मिते गृह्यस्मार्तश्रौतसूत्रात्मनि स्वप्रबन्धे निबबन्ध । अत एव वैखानसाः सर्वेऽपि वैष्णवा एव विलसन्ति । 'अग्निर्वै देवानामवमः, विष्णुः परमः' इत्यादिश्रुत्युपन्यासपूर्वं नारायणपरायणत्वं यथायोगं सर्वतोऽयं समादिशति । नूनमन्यनिरपेक्षं सर्वं स्वसूत्रादेवाध्येतृभिरवगन्तव्यमिति मनीषाऽस्येति ज्ञायते, यदयं गृह्यधर्मान् सप्रपञ्चं निरूपयामास; उपरि ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासि-रूपाश्रमेष्ववान्तरभेदान् बहून् दर्शयामास, संकरजातिवृत्तवैविध्यं वितेने; वानप्रस्थानां

श्रामणकाग्निं स्वयमुपदिदेश । श्रौते सर्वत्र पौण्डरीककुण्डविधानमप्येतदुपङ्गं लक्ष्यते । नित्यहोमान्ते नित्यं विष्णोरर्चनं कर्तव्यमिति, 'विष्णोरर्चना सर्वदेवार्चना भवतीति ततः यज्ञेषु यत् विहीनं तत् सम्पूर्णं भवतीति विज्ञायते' इति; 'द्विजातिरतन्द्रितो नित्यं गृहे देवायतने वा भक्त्यां भगवन्तं नारायणमर्चयेत्' इति च प्रतिष्ठाविधिपुरस्सरं परममुपदेशं प्रतन्वन् सर्वप्रकारप्रशंसनीय एवैष भ्राजते ॥

नन्वत्रिप्रोक्ते समूर्तार्चनकल्पे, 'यश्च वैखानसीं शाखामादौ अध्यापयन्मुनीन् । नाम्ना विखनसं प्राहुर्यश्च वैखानसं तथा । ऋषिणा तेन संप्रोक्तं सूत्रे वैखानसे मतम्' इत्युक्त-मस्ति । न खलु वैखानसशाखेति काश्चन शाखामन्यत्र श्रृणुमः । कश्चासौ विखनाः, कथश्च वैखानस इति चेत् –

किमयं जिज्ञासया प्रश्नः– आहो तदप्रामाण्यकल्पनहृदयेन? । अप्रामाण्य-शङ्किनस्तावत् प्राच्यैरेव परास्ताः– यतो बोधायनधर्मद्वितीयखण्डे, 'वानप्रस्थो वैखानशास्त्रसमुदाचारः' इति, श्रामणकाख्यवैखानससूत्रदर्शिताग्निविधानं वान-प्रस्थस्याभ्यधायि । आपस्तम्बादयोऽपि वानप्रस्थाग्नाविव पौण्डरीककुण्डादावपि विखनस्सूत्रमेव प्रमाणत्वेन परिजगृहुः । सर्वप्रमाणभूतः सर्वतो ज्येष्ठः श्रेष्ठश्च तत्र भवान् मनुरपि वानप्रस्थधर्मनिरूपणावसरे 'कालपक्वैः स्वयं शीर्णैः वैखानसमते स्थितः' (६-२१) इति वैखानसपदं प्रायुङ्क्त । व्यासकृतधर्मकाण्डे च 'कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते । वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः', इत्यादिस्थितमुदाहरन्ति ।

भागवतपदं वैखानसपाञ्चरात्रोभयविषयमाशेरते । भगवन्मुखोद्गतपाञ्चरात्र-ग्रन्थमूलकस्य मतस्येव भगवदुपदेशमूलकविखनोग्रन्थमतस्यापि भागवतत्वम्, भगवदेकान्तमहाजनमतत्वाद्वोभयत्र भागवतत्वम् । श्रीमन्निगमान्तमहादेशिकैश्च न्यायपरिशुद्धौ प्रमाणाप्रमाणपौरुषेयग्रन्थविभजनावसरे विस्तरेण वैखानसप्रामाण्यं प्रत्यपादि । सच्चरित्ररक्षायाश्च ऊर्ध्वपुण्ड्रधारणविधौ भस्मप्रस्तावे, 'एतेन विखनः-सूत्राद्युक्तमपि तत्कर्ममात्राङ्गत्वेन निर्व्यूढम्' इति प्रमाणार्थो वर्णितः । तत्र सूत्रे प्रथमप्रश्नान्ते होमानन्तरं, 'भस्म गृहीत्वा ललाटहृद्बाहुकण्ठादीन् ऊर्ध्वाग्रमालिप्य' इत्युक्तमिहाभि-

प्रेतम् । प्रागेव धृतोर्ध्वपुण्ड्राणां होमानन्तरभस्मधारणं मृण्मयोर्ध्वपुण्ड्रनिवारकं न भवति । ऊर्ध्वाग्रतयैवैतद्धारणमप्युच्यत इति न तिर्यक्पुण्ड्रप्रसक्तिः । तत्रैव भगवन्निवेदितोप-योगाधिकारे, "श्रीवैखानसेऽप्यत्रिसंहितायां (४३)

'मन्त्रेण पादे यद्दत्तमाधावं पाद्यमुच्यते ।
तत् पाद्यात्तीर्थमादाय भक्त्या देवमनुस्मरन् ।
आत्मानं प्रोक्षयेत् यस्तु सर्वपापैः प्रमुच्यते ॥'

इति वचनं स्थितं प्रमाणतयोपन्यासि । अत्र आधावमित्येतत्स्थाने माधवे इति सच्चरित्ररक्षायां लेखकप्रमादः । तदनुसारिव्याख्यानमपि तत एव त्याज्यम् । आधावशब्द एव मूले स्थितः । धावनं हि क्षालनम् । "न कास्ये धावयेत् पादौ" इति मनुः । प्रसिद्धश्च आधावशब्दो जलार्थकः बहुत्र वैखानसग्रन्थेषु ।

अतो वैखानसस्य सर्वाचार्यसंमतत्वात् पाञ्चरात्रमादृत्य वैखानसे अनादरोऽपि न युज्यते । उक्तञ्चैभिः शरणागतिदीपिकायाम्,

"त्वां पाञ्चरात्रिकनयेन पृथग्विधेन
वैखानसेन च पथा नियताधिकाराः" इति ।

पाञ्चरात्रं चतुर्धा भिद्यते, आगम-मन्त्र - तन्त्र - तन्त्रान्तराख्यसिद्धान्तभेदात् । एतन्नामपर्यायतयाऽपि स्वयंव्यक्त - दिव्य - सैद्धार्षनामानि पठितानि कालोत्तरे इति श्रीपाञ्चरात्ररक्षातोऽवगम्यते । तथा, 'वैदिकं तान्त्रिकं श्रौतं मिश्रञ्चेति चतुर्विधम्' इत्यपि वचनान्तरम् । 'दिव्यं - सात्त्विकं - राजसं - तामस'मिति चतुर्धा पाञ्चरात्रग्रन्थान् विभज्य साक्षाद्भगवन्मुखोद्गतं यत् रत्नत्रयं सात्त्वतं पौष्करं जयाख्यमिति च तादृशानां दिव्यत्वमित्यादिवर्णनात् प्रकारान्तरेणापि विभागो लक्ष्यते । सर्वमिदं परस्परासंकीर्णमेव संरक्ष्यम्; अर्चनसंकरो न युक्त इति च निरधारि । एवं पाञ्चरात्रिकप्रक्रियाणां पृथग्भूतत्वेऽपि वैखानसे पार्थक्यं न भवति । तदिदमत्रिणा वैखानसपाञ्चरात्ररूपवैष्णवविधिद्वैविध्यं

तत्संकरस्यायुक्तत्वञ्च वर्णयता (८०)

"वैखानसविधिश्चैव चतुर्धा भवति द्विजाः ।
आत्रेयः काश्यपीयश्च मारीचो भार्गवस्तथा ॥

एतैर्वैखानसं प्रोक्तं सूत्रं वैखानसं स्मृतम् ।
एषां चतुर्विधानां तु मूलं तत् सूत्रमेव यत् ॥

आत्रेयाद्यास्त्विमे सर्वे तस्माद् वैखानसाः स्मृताः ।
अन्योन्यसंकरे तस्माद् दोषो नास्त्येक एव सः ॥"

इति, अर्चनापद्धतौ वैलक्षण्योपलम्भेऽपि सांकर्यस्यादोषतामभिदधानेन स्पष्टमदर्शि, "वैखानसविधिश्च" इति चकारः पाञ्चरात्रतौल्यं विभागमात्रे स्थितं दर्शयति । अत्रायं संग्रहः–

तन्त्रान्तनामविख्यातमत्रिग्रन्थचतुष्टयम् ।
अधिकारान्तनामानः त्रयोदश भृगोरपि ॥३॥

त्रयः काण्डान्तनामानो ग्रन्थाः काश्यपनिर्मिताः ।
मरीचिना संहितान्तनामानोऽष्टाविति स्थितिः ॥४॥

सर्वेषामपि मूलं स्यात् विखनस्सूत्रमादिमम् ।
अनृषिग्रथिताः ग्रन्थाः अन्ये सर्वानुयायिनः ॥५॥

पाञ्चरात्रसिद्धान्तनिष्ठाश्च त्रयीधर्मत्यागेन एकायनश्रुतिविहितानेव चत्वारिंशतं संस्कारान् अनुतिष्ठन्तः वंशपारम्पर्येण स्वधर्मनिष्ठा पृथक्स्थिताः सर्वतः प्रसृतवैखानसतदितर - संप्रतितनश्रीवैष्णवविलक्षणा इति च श्रीभगवद्यामुनमुनिभिरागमप्रामाण्ये समवर्णि । तद्वत् आपस्तम्बादिसूत्रान्तरनिष्ठवच्च वैखानसाः स्वसूत्रोक्तविधया निषेकादिसंस्कारान् सर्वान् अनुतिष्ठन्तो वैदिकाः, वसिष्ठस्मृत्यादिसमादृतविष्णुसमर्चनपरतया वैदिकतराः, वैदिकमन्त्रैरेव तदाचरणात् वैदिकतमाश्च भवन्ति ।

विखनाश्चायं प्रमाणभूतः । वैखानसशब्दस्तावत् वेदेष्वपि दृश्यते । "वैखानसं पूर्वेहन् साम भवति" इति सामविशेषस्य तदृषिदृष्टत्वं श्रूयते । ऋचश्चानेकाः तद्दृष्टाः सन्तीति ऋग्वेदे सायणभाष्ये । अस्ति वानप्रस्थेष्वपि वैखानसपदप्रयोगः । नूनं स विखनस्सूत्रोक्तरीतिसंपादितश्रामणकाग्निमत्त्वनिबन्धन इति विदितम् । अतो वैखानसर्षिसंबन्धात् ते प्रयोगा इति सिद्धः एक एवमृषिः । विखनश्शब्दश्च श्रीभागवते गोपिकागीते 'विखनसाऽर्थितो विश्वगुप्तये सख उदेयिवान् सात्त्वतां कुले' इति ब्रह्मणि प्रयुज्यते । स एव व्यासकर्मकाण्डस्थितं, 'खनित्वा चात्मनाऽऽत्मानं धर्मादिगुणसंयुतम् । ध्यानमाविश्य योगेन ह्यासीद्विखनसो विभुः' इति वचनमनुरुद्ध्य– विशेषेण खननात् गभीरार्थोद्धरणात् विशिष्टवैष्णवधर्मावधारणौपयिकमीमांसनविशेषात् "विखनाः" इति, "विखनसः" इति चोच्यते इति ज्ञायते । अत एवोच्यते–

'ततः परं चतुर्वक्त्रो जटाकाषायदण्डभृत् ।
नैमिशारण्यमास्थाय मुनिबृन्दनिषेवितम् ॥
धाता विखनसो नाम्ना मरीच्यादिसुतान् मुनीन् ॥' इत्यादि ।

विखनस एव वैखानसः । ब्रह्मणा तपउपयोगिरूपान्तरपरिग्रहात् मूर्तिभेदेन पितापुत्रभावमपि केचिदिच्छन्ति ।

एवं सर्वसूत्रकारसमादृतत्वात्, मनुमरीच्यादिपुरस्कृतत्वात्, सर्वप्रवर्तक-चतुर्मुखत्वात् विष्णूपदिष्टवैष्णवार्थस्थापनार्थविशेषतपश्चर्याशालित्वाच्च विखनाः प्रमाणभूतः । तत्सूत्रस्य च कात्स्न्र्येन वेदमन्त्रमयत्वात्, 'यत्सूत्राद्यन्तमद्ध्येषु भगवान् विष्णुरव्ययः । यष्टव्यो गीयते तस्मात् सर्वसूत्रोत्तमं तु तत्' इत्युक्तातिशयशालित्वात् सूत्रान्तरनिरपेक्षसर्वांशनिरूपकत्वात् उपलभ्यमानशाखामूलकत्वस्य प्रायः स्थितत्वाच्च स्थितमतिशयितं प्रामाण्यम् ।

वैखानसशाखा नोपलभ्यत इति चेत्-उपलभ्यत एव । तैत्तिरीयशाखैव एवमेव वा ईषदन्यथा वा स्थिता तथा व्यपदिश्यते । अत एवोच्यते–

'आदिकाले तु भगवान् ब्रह्मा तु विखना मुनिः ।
यजुश्शाखानुसारेण चक्रे सूत्रं महत्तरम् ।।' इति ।

तैत्तिरीयेष्ववान्तरभेदः औखेया इति । तदधीतत्वादौखेयशाखेति व्यवहारः प्रागासीत् । पश्चात् विखनसि गौरवात् वैखानसशाखेति सैव व्यवहारपदमासीत् । सम्पूर्णतैत्तिरीयानुसारश्च स्पष्ट एव तदीये श्रौतेऽपि । यथा च काठकं कालापकमित्यादीनि शाखानामानि तत्तन्महर्षेरेव व्यासानुमतस्य तत्र प्रधानप्रवर्तकत्वात्-तथा विखनोमुनिकल्पसूत्रप्रधानमूलभूतत्वात् तदादृतत्वात् तन्महर्षिगौरवेण तन्नाम शाखाविशेषस्येति । याज्ञवल्क्येन शुक्लयजुःशाखेव विखनसा काचित् प्रवर्तितेत्येतदपि, तस्मिन् स्थितं भगवदनुग्रहविशेषं विदुषां नासंमन्तव्यम् ।

एतत्सूत्रदर्शने च क्षत्रियवैश्यादयोऽपि एतदनुसारिणो बहव इत्यवगम्यते । एतदुक्तविधानेन विष्ण्वर्चनमपि क्षत्रियवैश्यैरप्यनुष्ठेयमिति अत्रोक्तम् । सत्स्वेव कतिपयेष्वालयाराधकेषु एतत्सूत्रानुरोधिचत्वारिंशत्संस्कारभाजः गृहार्चाराधनतत्पराः प्राज्ञतमाः युक्ताश्च वर्णत्रयेऽप्यासन्निति व्यक्तम् ।

यद्येवमिदं प्रमाणम्, कथं तर्हि सूत्रान्तरनिष्ठैः सर्वैः विष्ण्वर्चनपद्धतिजिज्ञासाप्रेरितैः इदमेव नाद्रियते । सन्तु शाखान्तरनिष्ठाः कथमपि; तैत्तिरीयमधीयानाः विष्ण्वर्चनाय कथं वैखानसेन पथा न सञ्चरन्ते । आपस्तम्बीयादिसूत्रनिष्ठैर्वैष्णवैरेतत् वैदिकं वैखानसं पवित्रमनादृत्य किमिति पाञ्चरात्रिकेण पथा भगवदर्चनमाचर्यते इति चेत्-तावता वैखानसानां का हानिः? नूनं वैदिकोत्तमस्य वैखानसस्य तदंशे ग्रहणमादृतवद्भिरेव उपदेशकदौर्लभ्याद्वा कारणान्तराद्वा तान्त्रिकं प्रथमत आदृतम् । ततः तत्संप्रदायपारम्परी प्रवहन्ती न वैखानसस्यावकाशमर्पयतीति मन्तव्यम् । वस्तुतो मरीचिप्रभृतिभिः 'वैखानससूत्रेण निषेकादिसंस्कारक्रियायुक्तान् विप्रान् वेदविदः' इति तत्सूत्ररीत्या निषेकादिसंस्कृतानामेव तदुक्तार्चाप्रतिष्ठाद्यधिकारप्रदर्शनात् सूत्रान्तरनिष्ठाः तत्र स्वानधिकारमालोच्यापसस्रुः ।

यद्यपि पाञ्चरात्रेऽपि चत्वारः सिद्धान्ताः प्रतिनियताः प्रसिद्धाः । ते च एकायन-श्रुतिविहितगर्भाधानादिदाहान्तसंस्कारान्तरसेविभिराद्दता इति कथं तदन्येषामेषां ऋग्यजुस्सामादिशाखान्तरसूत्रान्तरनिष्ठानां तदुक्तार्चनप्रक्रियादरणप्रसक्तिरिति शंक्येत. अथापि, 'वैदिकस्तान्त्रिको मिश्रः' इति केवलतान्त्रिकव्यतिरिक्तानामपि पाञ्चरात्र-प्रक्रियासद्भावो गम्यते इति तदादर इति मन्तव्यम् । तथा हि, 'ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च नित्ययुक्तैः स्वकर्मसु ॥ सात्त्वतं विधिमास्थाय गीतः संकर्षणेन यः । द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ॥' इत्यतः शाखान्तरसूत्रान्तर-निष्ठब्राह्मणादिसर्वसाधारण्याय सात्त्वतप्रक्रिया कलियुगप्रक्रमे प्रचारं प्रापीत्यवगम्यते । अत एव प्रचारोपदेशकाले पाञ्चरात्राप्रामाण्यमाशंकमानैरारोपितानां दोषाणां परिहाराय भगवता बादरायणेन तत्समयसामयिकेन पाञ्चरात्रप्रामाण्यं शारीरके प्रतिष्ठाप्यमासीत् । वैखानसं तु तत्सूत्रमात्रनिष्ठैराद्दतं सूत्रान्तराणामिव तत्सूत्रस्यापि वैदिकस्य प्रामाण्या-क्षेपप्रसक्त्यभावात् सूत्रान्तरनिष्ठेषु तत्प्रचारस्याकृतत्वाच्च अनाशंकितप्रामाण्यम् अप्रामाण्यशङ्कनप्रसञ्जकवाक्यलवलेशेनापि विधुरं सर्वविवेकिसमाद्दतप्रामाण्यमेव व्यजयत ।

अत एव शाङ्करभाष्येऽपि पाञ्चरात्रस्येषदंशेऽप्रामाण्यमानिनि भगवदर्चन-पद्धतिप्रदर्शकस्य पाञ्चरात्रस्य कथमप्रामाण्यमित्यप्रामाण्याक्षेपवचनमुखेन वैखानस-प्रामाण्यस्याप्रकम्प्यत्वमसूचि । अतो वैखानसस्य वैदिकोत्तमत्वं सर्वसंप्रतिपन्नम् । न खलु स्वानुपयुक्तत्वमात्रेण वस्तुश्रैष्ठ्यं विवेकी निह्नुवीत । न्यायपरिशुद्धौ च वैखानसा-प्रामाण्यवादी ब्राह्मणगर्दभत्वेन परिहसितः । भारमात्रवाही हि गर्दभः । 'वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः' इति च स्मर्यते । 'सर्वे वेदा यत्पदमामनन्ति', 'विष्णुनामा स वेदेषु वेदान्तेषु च गीयते' इत्युक्तं विष्णुपारम्यं प्रतिपाद्य तदाराधनरूपं परमार्थं वदते भागवतवरिष्ठाय वैखानसाय योऽभ्यसूयति, स खल्वधीतवेदोऽपि परमार्थज्ञानविकलो भारफलमलभमानो गर्दभ एवेति तदाशयः । किमित्येतावान् प्रयासः प्रगुणैः श्रीदेशिकैरिह विषये ऊढ इति चेत्-किमिति वा वैखानसेष्वप्रत्ययः केषाञ्चिदन्येषाम्? निष्कारणः कथमप्रत्यय इति चेत्-देवानां तपस्विषु च किमित्याक्रोशः? नूनं वैखानसैर्विशिष्ट-ब्रह्मवित्तमैः, "नेदंवित् अनिदंविदा संविशेत् । न सह भुञ्जीत", "अद्यप्रभृति हे लोकाः

यूयं यूयं वयं वयम् ।..... वयं तु किङ्करा विष्णोः यूयमिन्द्रियकिङ्कराः'' इत्याद्यनुरोधेन श्रीवैष्णवव्यतिरिक्ताः सर्वथा जातु वर्जिताः श्रीवैष्णवाश्च स्वालयार्चनादौ इति तन्मूलोऽयं असूयापारवश्यकृतो दूषणसंरम्भ' इति ।

न च वैखानसानां देवलकत्वादुपेक्षा । 'अच्युतः प्रीयताम्' इत्यनुतिष्ठतां ग्रामनगरादियोगक्षेमप्राधान्यबुद्ध्या प्रवर्तमानानाञ्च यदृच्छालाभतुष्टानां वृत्तिः न परसेवादिरूपश्ववृत्त्यादितो निकृष्यते । 'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासाः तव मायां जयेमहि', इत्युद्धवाशासनादि पश्यद्भिर्न भगवदुपयुक्तेषु निर्माल्यत्वं शङ्कितुं शक्यम् । प्रत्युत तदुपभुक्तादन्यस्यैवाघहेतुत्वं तदुपयुक्तानामघौघ-विध्वंसकत्वञ्च विस्पष्टपरशतवचनसिद्धम् । अतो निर्माल्यत्वदोषः जीवनार्थ-शास्त्रसंमतसंकरकारिपूजकविषये सर्वदेवतान्तरपूजकविषये च विश्रान्त इति युक्तिवचनोभयसिद्धमेतदपि । देवतान्तरपूजकगतं निकर्षपूजकत्वमात्रेणात्राप्यारोपयन्तस्तु अशास्त्रविदः, अत्र किं चित्रम्? यत् विद्वांसोऽपि 'व्याहर्तुमारभत भागवतप्रधानः' इति शुकब्रह्मादिषु बहुमानाय प्रयुक्तं भागवतपदमपि छान्दसरामायणादिपदानि अविवेकिन इव हेलनबुद्ध्यैव प्रयुञ्जते । नूनमियं नास्तिक्यकाष्ठा । तस्मात् वैखानसस्य वैदिकवैष्णवोत्तमत्वमेवापराध्यति । तत्प्रयुक्तयैव ह्यभ्यसूयया किमप्यभिमन्यते । कश्यपादयः देवतान्तरत्यागेन विष्णुमात्रयजनोपदेशिनः । एवमनन्यजननिबन्धनं पारमैकान्त्यं यदा भवति, तदैव ब्राह्मण्यस्य पूर्तिरित्याशयेनैव, ''बाल्यं पाण्डित्यञ्च निर्विद्याथ मुनिः । मौनममौनञ्च निर्विद्याथ ब्राह्मणः''इति मुनित्वसमनन्तरमेव पुष्कलब्राह्मण्यमाह बृहदारण्यकम् । वैखानससूत्रे च प्रक्रमे नारायणपरायणस्यैव मुनित्वममानि । ब्राह्मणैः सर्वैरपि वैष्णवैरेव भाव्यमित्यद्वैतिनोऽपि केचिदास्थिषत । एवं स्पष्टवादी मुनिर्वैखानस एव परमार्थवादी भवत्याप्ततमः । एवं प्रशस्ततमस्यापि वैखानसस्यान्यैरननुष्ठानं प्रागुक्त-युक्त्यैव ।

शारीरक इव महाभारतेऽपि पाञ्चरात्रस्य तदनुयायिनां च सर्वातिशायी प्रकर्षः प्रपञ्चितः । सर्वमिदं पाञ्चरात्रैकनियतव्यतिरिक्तैरपि पाञ्चरात्रप्रक्रियया भगवदर्चनं परमाय

श्रेयस इत्याशयेनैव । 'अस्मात् प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवः स्वयम्' इति मनुस्मृतेरपि पाञ्चरात्रं मूलमिति तत्रावाचि । अत एव मन्वनुरोधिसर्वस्मृतिकारसंमतं पाञ्चरात्रमिति स्मृत्यनुवर्तिनां वैदिकानां पाञ्चरात्रपरिग्रहः प्रामाणिक एव । अतः परैः पाञ्चरात्रं परिजगृहे ।।

ननु-सूत्रान्तरदर्शितरीत्या निषेकादिसंस्कारसंस्कृतैः विष्णवर्चनस्य तत्र विशदतया पाञ्चरात्रग्रहणवत् वैखानसग्रहणमपि युज्यते, अन्यथा कथमुद्धवः श्रीकृष्णं क्रियायोगं सात्त्वतसंमतमिव "यथाह भगवानजः। पुत्रेभ्यो भृगुमुख्येभ्यः" इति भृग्वादिभ्यो विखनोरूपचतुर्मुखोपदिष्टमपि पृष्टवान् स्यात् । श्रीकृष्णो वा स्वाभिमततया पाञ्चरात्र-प्रक्रियामात्रमनुपदिश्य किमिति, "वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः । त्रयाणामीप्सितेनैव विधिना मां समर्चयेत्" इत्युपदिष्टवान् स्यात् । स्यान्नाम शाखान्तरनिष्ठानां पाञ्चरात्रे स्वरसप्रवृत्तिः । तैत्तिरीयाणां तु सर्वेषां तत्रत्यमन्त्रभूयिष्ठे वैखानसाराधने संभाव्यतेऽधिकारः इति चेत्- संभाव्यते । अथाप्युक्तमेवोत्तरम् । आलयेषु वैखानससूत्रोपदिष्टसंस्काररहितानामनधिकारस्य तद्ग्रन्थारूढतया । तत्रैषां प्रवेशभिया च वैखानसैः स्वमार्गः परेभ्योऽनुपदिष्ट आसीत् । अतस्तान् परमैकान्तिन उपदेशाधिकृतान् न लेभिरे । पाञ्चरात्ररीत्यनुसारिणश्च परमैकान्तिसार्वभौमाः श्रीवैष्णवसिद्धान्तधुरन्धराः प्रपत्तिमार्गोपदेशपरमां सिद्धिं प्रापयितुं प्रभविष्णवः सदाचार्याः सुलभा आसन्निति । इदमप्यत्र वक्तव्यम् - श्रीपाञ्चरात्ररक्षायां पाञ्चरात्ररीत्या चतुर्विधपूजनप्रस्तावमध्य एव, "वैदिकं तान्त्रिकं श्रौतं मिश्रश्चेति चतुर्विधम्" इति चातुर्विध्यमुक्तमस्ति । अतो वैखानसं वैदिकम्, पाञ्चरात्रं तु तान्त्रिकमित्यर्चनवैषम्यं वैखानसग्रन्थप्रदर्श्यमानं स्वमतप्रशंसा-मात्रम् । "आग्नेयं पाञ्चरात्रम्, सौम्यं वैखानस"मिति तत्र वर्ण्यते । कथं तदाग्नेयमित्यत्र कारणदर्शिभिस्तैः, 'आग्नेयमित्येव स वासुदेवः प्रोवाच तत् केवलमोक्षदत्वात्' (अत्रिः७८) इत्येवं मोक्षमात्रप्रदं तत्, वैखानसं तु ऐहिकामुष्मिकार्थत्वात् सर्वसेव्यमित्येवोच्यते । तावता पाञ्चरात्रस्य प्राशस्त्यमेव । वस्तुतः आगमसिद्धान्तस्यैकस्य मोक्षैकफलप्रदत्वम्, अन्येषां मन्त्र-तन्त्र-तन्त्रान्तराणां सिद्धिमोक्षोभयप्रदत्वञ्च पाञ्चरात्रोक्तमिति नायं वैखानसस्य विशेषः । आगमसिद्धान्तानुसारेण प्रतिष्ठिते स्थलेऽपि पश्चादन्यप्रवेशनमयुक्तमित्यपि तत्र न्यरूपि । तापसंस्कारदीक्षितैरनुष्ठेयत्वात् पाञ्चरात्रमाग्नेयमाहुरिति न । निन्दार्थमेव तथा -

प्रयोगात् । पाञ्चरात्रिकैश्च संकरपरिहारकैः "आग्नेयं वैखानसं, पाञ्चरात्रं सौम्य"मिति विपरिवर्त्यते । यथा तन्त्रसारसमुच्चये 'अश्रीकरमसौम्यञ्च वैखानसमसात्त्विकम्' इति । तस्मात् सौम्यमपि वैखानसाराधितस्थले पाञ्चरात्रे प्रवेश्यमानं विनाशकत्वादाग्नेयं भवति, तथा सौम्यमेव वैखानसमपि पाञ्चरात्रदेशे आग्नेयं भवतीति परस्परासङ्करावश्यकत्वाभिप्रायमेतत् । अतः वैदिकावैदिकविभागोऽपि क्वचित् तांत्रिकसद्भावमात्रेण सर्वत्र तदारोपात् ।

अत्रिग्रन्थ एव वैखानसे, 'एकायनगतैर्मन्त्रैः संमिश्रं तान्त्रिकं स्मृतम्' (१८) इति वैदिकमन्त्रसद्भावः पाञ्चरात्रे इष्यत एव । एतत्पूर्वार्धे, 'आपत्काले च संप्राप्तं याज्ञवल्क्यादिभिः क्रमात्' इत्युक्तेः शुक्लयजुश्शाखाप्रवर्तकयाज्ञवल्क्यादिभिरर्चनप्रकारजिज्ञासुभिरेष परिगृहीतमार्गः इत्यतोऽपि सर्वसाधारण्यं पाञ्चरात्रस्य सिद्ध्यति । अतः पाञ्चरात्रं वैदिकमप्यस्ति । अस्त्वेतत् । पूर्वोक्तवाक्ये वैदिकं श्रौतमिति द्वैविध्यं कथमिति चेत्-उच्यते पाञ्चरात्रमेकायनश्रुतिमूलमिति सम्प्रतिपन्नम् । एकायनञ्च वेदमूलभागः । 'महतो वेदवृक्षस्य मूलभूतो महानयम्'' इत्युक्तेः । एको हि महान् वेदवृक्षः बहुधा विभज्यते । तत्र प्रणवः परममूलभूतः । तदुपरितनः शाखाविभागभागतः प्राक् मूलसन्निहितः स्कन्धभागः भगवत्पारम्यतदर्चनोपासनादिमात्रपर एकायनमुच्यते । ततो भगवत्सृष्टविधिदेवादिपूजनादिष्वपि व्यापृतः ऋग्यजुस्सामाथर्वाख्यशाखाचतुष्कविभागशाली भागः । तत्र एकैकशाखायामप्युपशाखाः यथायथं स्थिताः । या वेदव्यासेन पृथक् पृथगध्यापिताः सम्प्रति जगति जाग्रति । इमाश्च शाखाः नानाविधार्चनयानयजनादिपराः परमर्षिव्यतिरिक्तानां तत्त्वहितपारम्यप्रतिपादनाक्षमा इति एव वदन्ति । उपक्रमोपसंहारैक्यसम्पत्तये परं मात्रया तत्तच्छाखान्ते उपनिषदि स्कन्धगतार्थः प्रदर्श्यते । ताश्चोपनिषदः न्यग्रोधस्यास्य शिफायमानाः वेदवृक्षमिमं पुष्णन्ति मूलभागमेकायनमनुसरति पाञ्चरात्रम् ।

न केवलमेतत् वैखानसेऽपि किञ्चिद्वक्तव्यमस्ति । तत्रापि 'वेदानां व्यसनादर्वाक् प्राग्रूपं मिलितं तु यत् । तां तु वैखानसीं शाखाम्' इति वचनं पठन्ति । अर्वागित्यत्र

पूर्वमित्यपि पाठान्तरम् । सर्वथा व्यस्तवेदभागव्यतिरिक्तसमस्तांशमूलक
वैखानसेऽप्यवगम्यते । स चांशो भगवदाराधनविषयक एव । स तत्र प्रपञ्च
निरूपितोऽस्तीति विखनसा तत् स्वसूत्रे समयोजि ।

तद्वत् पाञ्चरात्रमपि मूलवेदमूलकत्वात् वैदिकम् । तत्र चतुर्षु सिद्धान्तेषु द्वयं
श्रौतवैदिकविभागस्तु - 'तन्निष्ठैः परम्परयाऽधीतवेदमूलकः एकः; उपदेशकाले भग
दादिमुखश्रुतवेदमूलकः खिलश्रुतिमूलकोऽन्यः' इत्याशयेन । तान्त्रिकं मिश्रञ्च वेदमूलकम्
श्रुतिवाक्यप्रदर्शनविनाभूतोपदेशविषय इति विशेषः । सर्वस्य श्रौतत्वेऽपि प्रणवयोगि
मन्त्रमात्रसत्त्वे वैदिकत्वम्, तदयोगिमन्त्रमात्रसत्त्वे तान्त्रिकत्वमित्याद्यपि भाव्यम् । साक्षा
भगवद्भाषितं, ब्रह्मादिमुनिभाषितं, अयोगिभाषितं इति भेदोऽप्यस्ति । एवञ्च उद्ध्ववाक्
वैदिकपाञ्चरात्राभिप्रायकमपि स्यात् । अत एव 'वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारण
(भागवतम्-११) इति दीक्षायाः वैदिकत्वमप्युक्तं घटते । अन्यथा हि वैखानसैरपि दी
स्वीकार्या स्यात् । एवमपि भृग्वादिभ्यो ब्रह्मकृतस्योपदेशस्यात्र भागवते वचना
वैदिकत्वाविशेषात् व्यामिश्रयागकारित्वकृतमिश्रत्वाद्वा वैखानसमपि ग्राह्य
मेव । अपि च पाद्मे, "आद्यमेकायनं वेदं सद्ब्रह्मप्रतिपादकम् । तेनैव संस्कृता विप्रा
मुख्यकल्पाधिकारिणः । अन्येषां ब्राह्मणादीनां वर्णानां दीक्षया क्रमात् ।" इति सर्वे
पाञ्चरात्रसंबन्धः प्रत्यपादि । अस्यायमर्थः- एकायनाख्यमूलवेदमूलकपाञ्चरात्रसिद्धान्तो
चतुर्षु स्थिताः तद्रीत्यैव निषेकादिसंस्कारभाजः आलयेषु भगवन्तमर्चितुमर्हन्ति । ये त्व
वेदवृक्षोपरितनभागस्य अनुश्रवाख्यस्य, पूर्वश्रवानुश्रवभेदभिन्नत्वेन भोजराजादि
प्रदर्शितवेदविभागान्तर्गतपूर्वश्रवात्मकैकायनव्यतिरिक्तस्य अवान्तरशाखाविभागे
व्यासाध्यापितस्य अध्येतारः, तदवलम्ब्यानेकसूत्रारूढनिषेकादिसंस्कारभाजः भुवि सर्व
प्रसृताः, तेऽपि पाञ्चरात्रोक्तां दीक्षां प्राप्य तदर्चने अधिक्रियन्त इति । एवं सर्वसाधारण
पाञ्चरात्रस्य ।

अपि च वैखानसानामपि पाञ्चरात्रमुपजीव्यमित्यपि तत्रान्येषामादरः । जीव्यांशशोधने तु अभिप्रायभेदो लक्ष्यते । "ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः" । सर्वेषां कृतलक्षणत्वं चक्राद्यंकितत्वमुच्यते इति वैखानसानामपि तदिति केचित् । यः सूत्रान्तरानुपदिष्टस्य विष्णुबल्याख्यस्य संस्कारस्य पुंसवनानन्तरं ावादिद्वादशनामादिवैष्णवमन्त्रकहोमशिष्टमादाय पत्नीप्राशनविधानरूपस्य वैखानससूत्रे ्नात्, 'मा जनिष्ट स नो वंशे -' इति रीत्या स्ववंशे अवैष्णवोत्पत्तेरपि संमतत्वावधारणात् गर्भ एव वैष्णवत्वं प्राप्तमिति किमनया दीक्षया । न च सूत्रकारः र्वं सुविशदमितरानपेक्षमुपदिशन् तप्ताङ्कनं दिशापि प्रदर्शितवानस्ति । प्रत्युत त्यार्चनप्रकरणे अत्रिणा गुरुसमीपनयनरूपोपनयनतोऽन्ततः उपाकर्मानन्तर-ध्ययनाधिकारिणा सर्वमन्त्रग्रहणसंभवात्, 'यथोपनयनादग्नौ समिदाधानमर्हति । थोपनयनादूर्ध्वं विष्णोरर्चनमर्हति' इति उपनयनप्रभृत्येव यजनेऽधिकारः प्रादर्शीति किमर्था क्षा । पुण्ड्रसंस्कारश्च स्पष्टमुपदिष्ट एव मरीच्यादिग्रन्थेषु । अष्टाक्षरादि-न्त्राश्चान्याविशेषमध्ययनेनाचार्यमुखाच्च सुग्रहा इति न पृथक् दीक्षया साध्यं किञ्चिदस्ति । तो नेष्टं तप्ताङ्कनमिति परे । वैखानसविषये तप्ताङ्कनाभावे विष्ण्वर्चनवैगुण्यं वतीत्यस्याभावेऽपि तत् विष्णुचिह्नं विष्णुभक्तैरुपेक्षितुं न युज्यते । अत एव, 'चक्राङ्किताः वेष्टव्याः यावदागमनं मम', इति श्रीकृष्णस्यादेशः । न चेदमश्रौतम्, येनोपेक्षा स्यात् । ग्वेदादिमन्त्राणामेवात्र प्रमाणतयोपन्यासात् पाञ्चरात्रिकमात्रे विश्रान्तिकल्पनायोगात् । राणेष्वपि बहुषु तदावश्यकत्वस्योक्तेः । "यागोपकरणान्येवमर्घ्यपाद्यादिकान्यपि । लाञ्छ्यानि यथायोगं शङ्खचक्रादिलक्षणैः । स्वात्मोपकरणं सर्वमासनादिविवर्जितम् । ङ्गुलीयकपर्यन्तं सर्वमुष्णीषपूर्वकम् । चक्रादिलाञ्छितं कुर्यात् ।" इत्येवं तप्तेनातप्तेन वा क्रादिना यथायोगमङ्कनस्यावश्यकत्वे सर्वत्र विदिते, पूजकशरीरस्यानङ्कनं हि न ुज्यते । अतः "कृतलक्षणै"रिति वाक्यं पुण्ड्रादिकमिव चक्राङ्कनमपि गृह्णातीति ाराधनाङ्गत्वमपि तस्य युज्यते । पाञ्चरात्रिकस्य परं दीक्षितत्वव्यवहारः आलयार्थविशिष्ट-क्षाभिप्रायेण । 'वैखानसकुले जातः पाञ्चरात्रेण दीक्षितः । न दीक्षितो न जातो वै स वै देवलकः स्मृतः' इति वचनमपि देवलकपदसमभिव्याहारात् देवालयार्थदीक्षाविशेषे

वैखानसस्य अनधिकारपरम् । सूत्रान्तराद्यनुक्तत्वेऽपि विष्णवर्चनस्यावश्यकत्वावधारणात्च वैखानसानुक्तस्याप्यन्यतो ग्रहणं नानुपपन्नमित्यपरे । प्रातिस्विकाराधनस्य उपनयनानन्तरत्वेऽपि सामुदायिकाराधने चक्रादिधारणमुचितमिति उक्तावपि तापं विना चक्राद्यङ्कनस्यापि बहुवैष्णवसम्प्रदायसिद्धत्वात् पूजकस्य मरीचिग्रन्थे, 'सुदर्शन'मिति दक्षिणे हस्ते सुदर्शनमुद्रां धारयेत्, 'रवी'ति वामे शङ्खमुद्रां धारयेत्' इति मुद्राधारणस्यानुशिष्टत्वात् तद्वत्, यादृशतादृशसर्वजनप्रत्यक्षतार्हशङ्खचक्रचिह्नधारणं पर्याप्तमित्यन्ये । किमत्र विस्तरेण । कुत्रापि वैखानसप्राच्यग्रन्थे तप्तप्रस्तावस्याभावात् अन्यत्रावश्यकत्वकथनाच्च तप्ततप्तद्व्यायुधपञ्चायुधाद्यनेकप्रकारोपलम्भात् ''सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः'' इत्यलम् ।

एवं बहूनां मन्त्रकल्पानां वैखानसादरणीयानां पाञ्चरात्रत एव परिज्ञानमिति पाञ्चरात्रं सर्वोपजीव्यमिति प्राहुः । तथा प्रपत्तिरपि पाञ्चरात्रतोऽवगन्तव्या भवति । न च सा नेष्यते वैखानसैरिति सुवचम्-तदाहततैत्तिरीयशाखायामेवान्ते, 'तस्मात् न्यासमेषां तपसामतिरिक्तमाहुः' इत्येवं प्रपत्तेः प्रपञ्चनात्; वैखानसविरचिते लक्ष्मीविशिष्टाद्वैत-शारीरकभाष्येऽपि तदिष्टेश्च । तर्हि श्रुतिपुराणादिसुप्रसिद्धा शरणागतिः किमिति पाञ्चरात्रतो ग्राह्या भविष्यतीति चेत्-यथावत् प्रपत्तिस्वरूपावधारणं तत इति भाव्यम् ।

किं बहुना । आर्यव्यवहारविज्ञेयार्थानां वैदिकानामेव पिक-नेमादिशब्दानां कथमर्थावगमः कार्यः, किं व्युत्पत्तिकल्पनेन कोऽप्यर्थः यथारुचि स्वीकार्यः, उत यत्र क्वापि व्यवहारविषय इति विचार्य, तेषां शब्दानां म्लेच्छैर्व्यवह्रियमाणतया तद्व्यवहारं प्रमाणीकृत्य अर्थास्तदिष्टा एवादर्तव्या इति पूर्वमीमांसायामार्यम्लेच्छाधिकरणे निरणायि । एवं सति आर्याणां मध्ये परस्परोपजीवनं कथङ्कारं नेष्यते? अतो यथावत् प्रपत्तिस्वरूपम् आनुकूल्यसंकल्पाद्यङ्गकलापस्वरूपम्, अनुष्ठानक्रम इत्यादि वैखानसैः पाञ्चरात्रतो विशदमवगन्तुं सांप्रतम् ।

एवं सति अर्चनान्मोक्ष इति वैखानसपक्षः परित्यक्तः स्यादिति चेत्-अप्रपन्नाः वैखानसाः ध्यानसाहचर्येण मोक्षोपायतावुद्ध्या विष्णवर्चने भक्तिनिष्ठा अवैखानसा

इवाधिक्रियन्ते । प्रपन्नास्तु वैखानसाः तादृशा अवैखानसा इवैव परमपदे स्वयम्प्रयोजने कैङ्कर्य इवात्रापि घटमानाः तेन श्रियःपत्युः प्रीत्यतिशयमुत्पादयन्तः षोडशवर्णसुवर्णवत् परममुत्कर्षं वहन्तः परमैकान्तिसार्वभौमा भूत्वा विखनोमनोऽनुकूलतमा भवन्ति । एवं परमोत्साहेन भगवदाराधने व्याप्रियन्ते लोकमप्यनुगृह्णन्तीति महिष्ठ एषां प्रभाव इति परिशीलनीयम् ।

तस्मात् वैखानससंमतार्चनपद्धतेः प्रामाणिकत्वस्याविशेषेऽपि सर्वोपजीव्यत्वात् सर्वसमादृतत्वेन पुराणादिप्रसिद्धत्वाच्च वैखानसेतरे पाञ्चरात्रपद्धतिमेव परिजगृहुरिति तावता न वैखानसस्य, न वैतेषां न्यूनता । केवलश्रीमदष्टाक्षरमयमिदं यजनमिति चैषां पाञ्चरात्रे आदरातिशयः । 'अनुक्तमन्यतो ग्राह्यम्' इति सिद्धे चतुर्मुखरूपविखनोवचनात् साक्षाद्भगवन्मुखोद्गतं पाञ्चरात्रं श्रेयः, 'वक्ता नारायणः स्वयम्' इति प्रशंसनादिति च भाव एषाम् । एवमपि वैखानसस्य वरिष्ठत्वं प्रतिष्ठितम् ।

न केवलं वेदव्याख्यानभूतकल्पसूत्रप्रणेतृविखनोमुनिविहिततयैव विष्णवर्चनं वैदिकमित्युच्यते; किन्तु तथैव श्रूयमाणग्वेदविहितत्वादपि वैदिकमेतत् । यथा वेदतः सुखमग्राह्यः कर्मयोगादिर्गीतातो विशदमवगम्यते, यथा सर्वप्रमाणारूढ एव प्रपत्तिरूपोपायः पाञ्चरात्रत एव विशदमधिगम्यते, तथा श्रूयमाणवेदविहितमेव विष्णवर्चनमित्थम्भूतमिति विशदं ज्ञाप्यते वैखानसेषु पाञ्चरात्रेषु च विप्रकीर्णानेकश्रुत्यादिसंशीलनेन । तत्र काश्चिदृचं मरीच्यादयः प्रदर्शयन्ति । या 'प्र वः पान्तम्' इत्यादिः । न परं वैखानसा एव । शौनकोऽपि,

"शौनकोऽहं प्रवक्ष्यामि नित्यं विष्णवर्चनं परम् । प्र वः पान्तमन्धसो धीत्यर्धर्चेन विधानतः ।।" इत्याह ।

शौनको हि बह्वृचत्वेन श्रीभागवते श्लाघितः । 'शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ' इति अथर्वशिखोपनिषदि श्रवणात् अथर्ववेदसंबन्धो ज्ञायते । शान्तिककर्मणां शौनकोक्तविधानं प्रसिद्धम् । तानि च प्रायोऽथर्ववेदीयानि । एवं सर्ववेदविदा शौनकेन वैखानसैश्चोपन्यस्ता ऋगियम् –

'प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे प्रार्चत ।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ।।'

(ऋ.मं.१-१५५.१.)

अत्र सच्चरित्ररक्षायां शौनकग्रन्थग्रहणे अन्धस इत्यत्र अन्धतमस इति लेखकप्रमादः। ततस्तदनुसारि व्याख्यानमप्यन्यथा । अस्याः ऋचः इन्द्रविष्णूभयपरत्वमुत्तरमन्त्रतो विस्पष्टम् । अथाप्यर्थवर्णनं भाष्यमुपेक्ष्य महर्षिमरीचिशौनकाद्यानुगुण्याय अन्यथा कार्यम्। स्वरसमप्येतदेव ।

अत्र प्रार्चत इत्यस्य प्रकर्षेणार्चनम्= आराधनं कुरुतेत्यर्थः । कर्माकांक्षायां पान्तमिति संबध्यते । वः= युष्मान् पान्तं= परिपालयन्तं प्रार्चतेति । कोऽसौ पालक इत्येतत् प्रकरणतो निर्णेयम् । इतः प्राक्तन्यः ऋचः, ''विष्णोर्नुकं वीर्याणि'' इत्याद्याः । तत्र, ''विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि'' इत्यस्यार्धस्य वेदभाष्ये, ''यः पृथिवीविकारान् रजोमयान् लोकान् माति स्म, तस्य विष्णोर्वीर्याणि शीघ्रं प्रब्रवीमि'' (नुकमिति शीघ्रार्थकम्) इत्यर्थ उक्तः ।अत्र श्रीभागवतदशमस्कन्धगतम् (१०-५१), ''क्वचिद् रजांसि विममे पार्थिवान्युरुजन्मभिः । गुणकर्माभिधानानि न मे जन्मानि कर्हिचित्'' इति श्लोकम्, एकादशस्कन्धगतश्च, (११-४) ''यो वा अनन्तस्य गुणान् अनन्तान् अनुक्रमिष्यन् स तु मन्दबुद्धिः । रजांसि भूमेर्गणयेत् कथञ्चित् कालेन नैवाखिलशक्तिधाम्नः'' इति श्लोकमनुसृत्य अर्थो भाव्यः । स तावदृचः- योऽहं भूम्यां स्थितानि सर्वाणि रजांसि विशिष्य परिगणितवानस्मि, सोऽहं शीघ्रमवोचमेव तस्य विष्णोर्वीर्याणि, य उरुगायः त्रेधा विक्रान्तवान् इत्येवंरीत्या स्यात् । यस्मात् पार्थिवरेणुगणनमेव कर्तुमशक्तोऽस्मि, अत एव विष्णुवीर्यगणनेऽप्यशक्तः इत्यत्र तात्पर्यम् । आस्तामेतत् । एताश्च ऋचः त्रिविक्रमवैभववर्णनपूर्वं विष्णुपरमपदलाभाशंसनं कृतवत्यः । तेन तस्य सर्वपरिपालकत्वं बोधितमासीत् । अतः पान्तमिति तमेव गृहीत्वा अपेक्षितफलार्थ उपायः तदर्चनरूपो विधीयते । अन्धसः= अन्नात्, अन्नस्य समर्प्यस्य सद्भावादित्यर्थः । ल्यब्लोपे पञ्चमी वा; अन्नं प्राप्येत्यर्थः । अन्नं संभृत्य आराधनं कार्यमित्युच्यते । यागादिष्वल्पस्यैव अग्नौ होमात्

तेनाऽऽराधनमल्पमेव भवति । अर्चायाः पूजने तु यावदिष्टं दातुं शक्यत इति अभिमतनानानैवेद्यसमर्पणार्हमर्चनमेव युक्तमित्युक्तं भवति । कस्मै फलायेत्यत्र त्रिवर्गापवर्गात्मकफलद्वयायेति वक्तुम्, शूराय विष्णवे चेति । शूर इहेन्द्रः; उत्तरत्रेन्द्र-प्रस्तावात् । अत्रोत्तरार्धे द्विवचनश्रवणेन द्वित्वप्रतीतेश्च । श्रीमदष्टाक्षरद्वयमन्त्रादाविव चतुर्थी तत्प्राप्तिरूपं फलं ज्ञापयति । धियायते= स्तुतिप्रियाय, महे=महते; शूराय=शूरसंबन्धि ऐहिकामुष्मिकं सर्वं लब्धुमिति यावत् । तथा विष्णवे= परमप्राप्यं विष्णुमेव प्राप्तुमित्यर्थः ।

तयोर्महिमोच्यते उत्तरार्धे । अदाभ्या = अदम्भनीयौ- अनभिभाव्यौ यौ=इन्द्राविष्णू अर्वतेव= अश्ववत् स्थितेन साधुना= वाहनेन पर्वतानां सानुनि स्थिरं स्त इति । इन्द्रो मेघवाहनत्वात् पर्वतसानुषु लोकक्षेमाय वर्षणोद्युक्ते वारिवाहे विराजमाने समागतत्वेन भाव्यते । विष्णुश्च साम्प्रतमर्च्यत्वेन वर्ण्यमानत्वात् अर्चारूपीह भाव्यते । अर्चासु च श्रीवेंकटाद्रिनिलयः श्रीनिवासः मुख्यतया सांप्रदायिकैर्गृह्यते । श्रीरङ्गनाथो भवितुं, परमपदादवतरन् भगवान् तुङ्गे श्रीवेंकटाद्रिशृङ्गे पदं न्यस्य तत एव श्रीरङ्गं ययाविति हि वर्णयन्त्यभियुक्ताः । सा विष्णवर्चा प्राधान्यादिह वर्ण्यते । भगवान् आदौ अश्वात्मनाऽवतीर्णं गरुत्मन्तमारुह्य पर्वतमिममाजगामेति वेङ्कटाचलमाहात्म्ये स्थितमत्रानुसंधेयम् । अस्य चाद्रेः सप्तशैलात्मना प्रसिद्धत्वात् पर्वतानामिति बहुवचनम् । अर्चास्थैर्यं मनसिकृत्य तस्थतुरिति स्थिरा स्थितिरुच्यते । अन्यासामर्चामूर्तीनामिदमुपलक्षणम् ।

योऽश्वरूपं साधुं छन्दोमयं गरुत्मन्तमारुह्य सप्तशैलात्मकवेंकटाद्रिसानुनि अनभिभाव्यो महान् स्थितः- तिष्ठन्नस्ति, तस्य प्राप्तये तमेव पान्तं प्रार्चत । लोकक्षेमाय मेघवाहनीभूय चरति पर्वतेषु सर्वदा अनुपेक्षया य इन्द्रः, तदर्थमपि - तं वशयितुमपि - तन्मूलैश्वर्यरूपफलप्राप्तयेऽपि विष्णुमेव पान्तमर्चत । अर्जुनकृतकृष्णार्चनसंतृप्तशंकरनयेन द्रौपद्यन्नशकलकृतकृष्णतृप्तिसंतृप्तदुर्वासोन्यायेन सेवासंप्राप्तराजसंतोषाधीन-संतोषराज्याधिकृतवर्गन्यायेन च विष्णुमात्रार्चनमिन्द्रायापि भवति । अत एव, 'विष्णुदेवार्चा

सर्वदेवार्चा भवती'ति वैखानससूत्रम् । यथोक्तं श्रीमद्भागवते– ''यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः । प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या'' इति (११) । तस्मिन् प्रसन्ने च, 'अस्मै देवा बलिमावहन्ति' इति न्यायेन तन्नियमित इन्द्रः स्वयमेव पर्वतमासाद्य अस्माकं क्षेममवश्यं विधास्यतीति भावः ।

एवं सुस्पष्टार्चापरत्वचिन्तनादेव इयमृक् उभयैरप्युदाहृतेति ध्येयम् । एवम्भूतस्यार्चनस्याग्निहोत्रादिहोमगतन्यूनतापरिहारकत्वादपि आवश्यकत्वमभ्यधित सूत्रकारः । कथमस्य न्यूनतापरिहारप्रावीण्यमिति चेत्- किमत्र संदिह्यते? यत्, 'प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम्' । कर्मवैगुण्यपरिहाराय वा निषिद्धकरणनिमित्तदोषपरिहरणाय वा कृत्यपरित्यागप्रयुक्त-प्रत्यवायपरिहृतये वा विहितेषु प्रायश्चित्तेषु कृष्णानुस्मरणसमानं किमपि नास्तीति निश्चप्रचे, तदर्चस्योत्कर्षः खलु कैमुत्यसिद्धः । न केवलमिदम्; अर्चनस्याग्निहोत्रसाम्य-मप्यनेकप्रकारमभिमतमत्र ।

अग्निमथनार्थायां अरणावपि पुरुषाकृतिभावनाबोधनात् उत्पन्नस्याग्नेरपि मूर्तिताभावनमर्थसिद्धमिति अग्नौ होमो मूर्तौ होम एवेति तदपि मूर्त्याराधनमिव । अग्निमूर्तिरपि स्थितिशयनोपवेशरूपेण त्रेधा वर्णिताऽपि । एवमप्यग्निहोत्रार्चनममूर्तार्चनम्; इदं तु समूर्तार्चनमिति विभज्यते । समूर्तार्चनेऽपि–

'समूर्ता त्रिविधा ज्ञेया बिम्बकूर्चजलेष्वथ ।
उत्तमा बेरपूजा स्यात् मध्यमं कूर्चपूजनम् ।
अधमा जलपूजेति प्राह पूर्वं पितामहः ।'

इति विशेषोऽस्ति । परमपदे भगवतो बिम्बवत् स्थितत्वात् उपास्याकारसाम्याच्च बिम्बार्चनमेव वरम् । अर्चापूजनैकाभिरुचिभाजाम्, छान्दोग्ये, 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णः' इत्यादौ केशश्मश्रुप्रभृतेरपि हिरण्मयत्ववचनात् आदित्यमण्डलेऽप्यर्चैव विराजत इति भायात् ।

मरीचिसंहितायाम्, 'ब्रह्मा अग्निं पञ्चधा सृष्ट्वा पञ्चलोकेषु व्यभजत्' इति अग्निकुण्डलक्षणं प्रक्रम्य, स्वर्गलोकस्य चतुरश्रत्वात् आहवनीयकुण्डं चतुरश्रम्, अन्तरिक्षलोकस्यार्धचन्द्राकृतित्वात् अन्वाहार्यकुण्डम्, अर्धचन्द्राकृति, तथा भूमेर्मण्डलाकारत्वात् गार्हपत्यकुण्डं मण्डलम्, त्र्यश्रत्वात् महर्लोकस्य तद्वदावसथ्यम्, जनोलोकश्चतुरश्र इति तादृशं सभ्यम्' इति प्रत्यबोधि । सर्वश्रेयस्करसर्वदोषपरिहारकाहुति-स्थानभूतासाधारणपौण्डरीकाग्निकुण्डविषयेऽपि, तपोलोकस्य पुण्डरीकाकारत्वात् पुण्डरीकतेत्यभ्यधायि । नामसहस्रभाष्ये पुण्डरीकाक्षपदनिर्वचने पुण्डरीकपदं परमपदवाचीत्युक्तमप्यनुसन्धेयम् । एवञ्चेदृशकुण्डस्थापिताग्न्यधिकरणकाः होमाः सर्वलोकतृप्तिहेतव इति ज्ञापितं भवति । ईदृशाग्निहोत्रसाम्यं विष्ण्वर्चनस्य वर्ण्यमानं तस्यापि सर्वलोकसंप्रीणनत्वं सत्यमवगमयेत् ।

अत्रिप्रोक्ते समूर्तार्चनाधिकरणे पौण्डरीकस्याधिदेवो नारायण इत्युक्त्वा तत्र,

'सर्वनिष्कृतिहोमार्थं क्रतूनामुत्तरः क्रतुः ।
तदग्नौ सार्वकाम्यश्च यजेदित्याह पूर्वजः ॥' (१९.६४)

इत्युक्त्वा, प्राणवायोः पञ्चधा भेद इव विष्णुमूर्तेः पञ्चधा भेदो भवति सर्वप्राणिहिताय नामरूपभेदेनेति, 'पञ्चधा पञ्चात्मा' इति श्रुतिप्रमाणेनोपन्यस्य, तदर्थमग्नेरपि हरिप्रतिष्ठायां पाञ्चविध्यमिच्छन्तीत्यभिधाय, भगवन्मूर्तीनां तत्तदग्न्यधिदेवतात्वमप्यबोधि-विष्णुमूर्तिः सभ्याग्नेः, आहवनीयाग्नेः पुरुषः, सत्योऽन्वाहार्यस्य, गार्हपत्यस्याच्युतः, अनिरुद्धश्चावसथ्यस्येति । तेनाग्नौ पूजनं मूर्तिपूजनाविशिष्टमिति ज्ञायते । 'पञ्चधा पञ्चात्मा' इति वाक्यं ऋग्वेदीयत्वेनोद्धृतं तैत्तिरीयोपनिषदन्तेऽपि श्रूयते । अन्नमयप्राणमयमनो-मयविज्ञानमयानन्दमयरूपेण पञ्चात्मा, परव्यूहविभवहार्दार्चारूपेण पञ्चात्मा, वैखानसालयेषु प्रतिष्ठानुसारे पूर्वोक्तविष्णुपुरुषसत्याच्युतानिरुद्धरूपेण पञ्चात्मा, पाञ्चरात्रिकादिदर्शितरीत्या परवासुदेवव्यूहवासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपेण पञ्चात्मा, परमात्मस्वरूप-दिव्यमङ्गलविग्रहविशिष्टवेष-सात्त्विकाराध्यदेववेष- राजसाराध्ययक्षादिवेष - तामसा-राध्यभूतादिरूपैः पञ्चात्मेत्येवं पञ्चधा पञ्चात्मा नारायण इत्यपि भाव्यते ।

अग्न्यायतनेषु यथा हिरण्यशकलनिधानमावश्यकम्; तथाऽत्रापि, 'रत्नन्यासं न कुर्याच्चेत् सांनिध्यं न भवेद्धरेः,' 'नव रत्नानि विन्यस्य' इति तदावश्यकत्वमवगम्यते । अग्नेरभिमन्त्रणं भवति, भूर्भुवःसुवरिति । बिम्बे च, सुवर्भुवर्भूरिति मूर्धनाभिपादेषु व्याहृतिन्यास इष्यते (विमा.३३) । अग्न्यधिदेवानामालयमूर्तीनां पञ्चानाञ्चैक्यवत्, एवमर्चकस्य क्रमेण भगवद्विषययोगप्रवृत्तस्य धारणोपन्यासावसरे (मरीचि ९८) 'पादादिजानुपर्यन्तं पृथिवीस्थानं लकारसंयुक्तं अनिरुद्धमूर्तिधारणम्,ततः पायुपर्यन्तम् अपां स्थानं वकारसंयुक्तं अच्युतमूर्तिधारणम्, ततो हृदयान्तमग्निस्थानं रेफयुतं सत्यमूर्तिधारणम्, ततो भ्रूमध्यान्तं वायुस्थानं यकारयुक्तं पुरुषमूर्तिधारणम्, मूर्धान्तं व्योमस्थानं ह-(ष?) कारयुक्तं विष्णुमूर्तिधारणम्' इति अर्चामूर्तीनां धार्यमूर्तीनाञ्चैक्यमुपवर्णितमप्यनुसंधेयम् । प्रतिमार्चनं हि क्रमेण हृदये ध्यानस्य शेषतयाऽप्युपयुज्यते । अत्र पञ्चमूर्तिन्यासविषये पाञ्चरात्रिकसंमतपञ्चोपनिषन्मन्त्रन्यासैकरस्यं स्थितमपि यथार्हमनुसन्धेयम् ।

एवं ''गार्हपत्यात् स्थिरात् आहवनीयं यावत् संततमपां धारां स्रावयती''ति संबन्धकल्पनं यथाऽग्नौ, तथा ध्रुवकौतुकबेरयोः सांतत्याय संबन्धकूर्चनिक्षेपोऽपि क्रियमाणः साम्यं पोषयति । सभ्यावसथ्यौ विहाय गार्हपत्याहवनीयान्वाहार्यत्रयप्राधान्यवच्च अत्रापि कौतुकस्नापनबेरयोरुपेक्षया ध्रुवबल्युत्सवबेराणां प्राधान्यमित्यादि द्रष्टव्यम् ।

एवम्भूतालयार्चनं नगरवास्तव्यसर्वजनसश्रद्धविहिताग्निहोत्रसमं भवतीति, अग्निहोत्राकरणजनितप्रत्यवायपरिहारोपि प्रजानाम् इत उन्नेयो भवतीति महानेष धर्मः । ननु आधानाग्निहोत्रादेः पत्नीयजमानोभयकर्तृकत्वमिष्यते; 'पाणिग्रहणात्तु सहत्वं कर्मसु तथा पुण्यफलेषु' इत्यनुशिष्टेः । अत एव आदधीत, जुहुयात्, यजेतेत्यादौ कर्त्रेकत्ववचनं कथमित्याशङ्क्य दम्पत्योर्व्यासज्यवृत्तिकर्तृत्वमेकमित्येकवचनमुपपद्यत इति मीमांसकाः । नैवं भगवदाराधने पत्न्याः कर्तृत्वमस्ति । सर्वथा च आलयेषु स्त्रियः पचनपात्रशोधनादिष्वपि नानुमन्यन्त इति वैषम्यमिति चेत् - दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं बहुप्रकारं सर्वत्र संभावितमेव । वस्तुत आलयेष्वाराधकाः अध्वर्य्वादिस्थानीयाः । ग्रामनगराद्यन्तर्गतसर्वदम्पत्यनुष्ठेयाग्निहोत्रकार्यकरत्वादाराधनस्य ते सर्वे दम्पतयः

तदन्तर्गताराधकदम्पतिभ्यां सह कर्तृपदे स्थास्यन्तीति तौल्यमपि सुवचमिति किमनेन ।

एवमग्निहोत्रसाम्यात् उभयोः प्रकृतिविकृतिभावो ज्ञायत इति च वदन्ति । अत्राग्निहोत्रं प्रकृतिः, अर्चनं विकृतिरिति वदद्भिः कोऽयं प्रकृतिविकृतिभाव इष्ट इति विमर्शनीयम्, 'अग्निहोत्रहोम एवानादेः कालादनुवृत्त आसीत् । कालक्रमेण मूर्तिपूजापद्धतौ परिकल्पितायां तत्र जनानां रुच्युत्पादनाय तत्साम्यप्रतीत्युपपत्त्यनुगुणं सर्वं परिकल्पितम्' इति हठवादस्तु आस्तिकेभ्यो न रोचते । मीमांसकसंमतस्तु यः प्रकृतिविकृतिभावः, स नात्रास्पदं लभते । यत्र समग्राङ्गोपदेशः सा प्रकृतिः; या क्रिया ततोऽतिदेशादङ्गानि लभते, सा विकृतिरिति तैरुच्यते । होमार्चनयोः स प्रकृतिविकृतिभावो हि नैव संभाव्यते । वस्तुस्थितिस्तावदत्रेयमेव सर्वप्रमाणसमालोचने दर्शयितव्या भवति - ''वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सह'' इत्यादिप्रमाणतः अनित्यलोकेषु मूर्तिमन्तो देवा इवाकृतब्रह्मलोके स परवासुदेवो मूर्तिमान् विराजते इति निष्प्रकम्पः सिद्धान्तः । भक्ताः उपनिषदुक्तभक्तियोगनिष्ठया मुच्यन्ते; भागवताः मूलश्रुतिमूलक-वैखानसपाञ्चरात्रार्चनान्तनिष्ठया मुच्यन्ते । अत एव, 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति गीतयाऽपि , 'स्थानं प्राप्स्यसि शाश्वतम्' इति गीते स्थानविशेषे मूर्तिस्थितिर्व्यज्यते ।

ननु-वैखानसग्रन्थे वैकुण्ठस्य वैष्णवाण्डस्य हिरण्मयाण्डान्तर्गतत्वमवगम्यते इति चेत्-नैतत्-आनन्दसंहितायाम् (८७) 'परमात्मनः सकाशात् हिरण्मयमण्डमभवत्' इत्युक्त्वा, तदन्तर्गतानां सर्वेषामण्डानामुपरि सनातनं वैष्णवाण्डम्, तत्र आमोदप्रमोदसंमोदवैकुण्ठनामानः चत्वारो विष्णुलोका उपर्युपरि स्थिताः । 'तत्र आमोदे विष्णुः, प्रमोदे महाविष्णुः, संमोदे सदाविष्णुः, वैकुण्ठे सर्वव्यापी नारायणश्चाऽऽसीनः' इति -तत्र (९४) ''समाराधनविशेषात् चतुर्विधपदावाप्तिः- सालोक्यं सामीप्यं सारूप्यं सायुज्यमिति - आमोदप्राप्तिः सालोक्यम्, प्रमोदप्राप्तिः सामीप्यम्, संमोदप्राप्तिः सारूप्यम्, वैकुण्ठप्राप्तिः सायुज्यमिति-तच्च नित्यानन्दं.....परज्योतिःप्रवेशनम् 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इति च'' इति ह्युक्तम् । अत्र हिरण्मयाण्डोत्पत्तिकथनं तदन्तर्गत-

सर्वाण्डसाम्यं वैष्णवाण्डे न मन्तव्यमिति ज्ञापनाय । अत एव तदन्तर्गतसर्वाण्डो-परितनत्वमुच्यते । तेन हिरण्मयाण्डोपरितनत्वमेवोक्तं भवति । अत एव तस्य तत्रैव सनातनत्वं सदापश्यत्सूरिकत्व - नित्यानन्दत्व-नित्यनिषेव्यत्वादिकश्चोक्तं संगच्छते । ''आमोदप्राप्तिः सालोक्यम्'' इत्यस्य - चतुर्णामपि लोकानां नित्यलोकत्वमविशिष्टम्; आमोदप्राप्तौ वैकुण्ठपुरुषसालोक्यमेव, तदुपरिगतौ वैकुण्ठपुरुषसामीप्यम्; तदुपरि सारूप्यमिति तात्पर्यम् । आलयेषु आराध्यमूर्तयो याः प्रसिद्धाः विष्णुपुरुषसत्याच्युता-निरुद्धनाम्न्यः, तत्र विष्णुस्तावदत्रोक्त एव । अन्येऽप्येवं दर्शिताः (८८)-'विष्णोरंशः पुरुषः, महाविष्णोरंशः सत्यः, सदाविष्णोरंशः अच्युतः, व्यापिनो नारायणस्यांशोऽनिरुद्धः' इति । क्रमेण धर्मज्ञानैश्वर्यवैराग्यमयत्वमेषामुक्तम् । समूर्तार्चनाधिकरणानुबन्धे च हिरण्मयाण्डम्, अण्डावरणानि, परा प्रकृतिः तमोनाम्नीति सर्वमभिधाय, तदुपरि अनिरुद्धस्य, अच्युतस्य, सत्यस्य, पुरुषस्य चोपर्युपरि स्थानानि निर्दिश्य तावता विष्णोरावासः कथित इत्यभिप्रायेण तदुपरि महाविष्णुः, तदुपरि च सदाविष्णुरिति न्यरूपि लोकस्थितिः । तस्मात् भगवल्लोकानां प्रकृतिबहिर्भूतत्वं शुद्धसत्त्वमयत्वञ्च निर्विवादम् । इमे एव लोकाः, 'पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयति' इति बहुत्वेन निर्दिष्टाः । अत एव श्रीभाष्येऽपि कार्याधिकरणे, ''परस्य ब्रह्मणः परिपूर्णस्य ... स्वासाधारणा अप्राकृताश्च लोकाः नात्यन्ताय न सन्ति, श्रुतिस्मृतीतिहासपुराणप्रामाण्यात्'' इत्यभाषि । अत्रोक्तानां विष्णुमहाविष्णुसदा-विष्णुनारायणमूर्तीनां पाञ्चरात्रोक्तानामनिरुद्धप्रद्युम्नसंकर्षणवासुदेवमूर्तीनाञ्चैक्यमपि संभाव्यते । अत एव श्रीवात्स्यवरदार्यगुरुभिरनुगृहीततया प्रथमानः श्लोकः वैखानसपाञ्चरात्रैकरस्यानुभावी -

''आमोदे भुवने प्रमोद उत संमोदेऽपि संकर्षणं
प्रद्युम्नञ्च तथाऽनिरुद्धमपि तान् संहारसृष्टिस्थितीः ।
कुर्वाणान् मतिमुख्यषड्गुणभिदायुक्तान् त्रियुग्मात्मकान्
व्यूहाधिष्ठितवासुदेवमपि तं वैकुण्ठनाथं भजे ।।'' इत्येवम् ।

श्रीपाञ्चरात्ररक्षायां व्यासादिनिबद्धश्रीवैष्णवधर्मशास्त्रकाण्डश्लोका अप्यत्रानुसंधेयाः । महर्षयो वैखानसपाञ्चरात्रोभयोपजीविन इति च ज्ञायते । तत्र हि -

'कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते ।
वैखानसाः कथं ब्रूयुः? कथं वा पाञ्चरात्रिकाः ॥'

इति पृच्छन्तं पाण्डवं प्रति भगवानाह -

"अष्टाक्षरविधानेनाप्यथवा द्वादशाक्षरैः ।
वैदिकैरथवा मन्त्रैर्मम सूक्तेन वा पुनः ।
पुरुषं तु ततः सत्यमच्युतं च युधिष्ठिर ।
अनिरुद्धञ्च मां प्राहुर्वैखानसविदो जनाः ।
अन्ये त्वेवं विजानन्ति मां राजन् पाञ्चरात्रिकाः ।
वासुदेवञ्च राजेन्द्र संकर्षणमथापि वा ।
प्रद्युम्नञ्चानिरुद्धञ्च चतुर्मूर्तिं प्रचक्षते ।
एता अन्याश्च राजेन्द्र संज्ञाभेदेन मूर्तयः ।
विद्धि अनर्थान्तरा एव मामेवञ्चार्चयेद् बुधः" ।। इति ।

अतो नामभेदेऽप्यर्थैक्यमधिगम्य सामरस्यमनुसन्धेयमिति सिद्धम् । अनुष्ठानवैषम्यं हे न सामरस्यविरोधि । तत्त्वांशे वैषम्ये सत्येव विरोधः । तत्तु न । तथा ज्ञेयस्य परमात्मनः नेष्कलसकलात्मना विभागः, सकलस्य निर्गुणसगुणात्मना विभागश्च वैखानसकृतो न प्रमेयविरोधी । तिले तैलमिव सर्वव्यापि परमात्मस्वरूपं तावत् निष्कलम्=निरवयवम् । निष्कलमेव परमानन्दविग्रहतया ध्यानगोचरीक्रियमाणं हृदयादिपरिच्छिन्नं सकलम् । तन्मात्रग्रहणे निर्गुणध्यानम्, देवीभूषणायुधपरिषद्गणसहितध्याने च सगुणध्यानमिति विविञ्चते । अद्वैताभिमतं तुं नैर्गुण्यं सर्वथा न संमतम् । गुणशब्द इह परिकरस्योपसर्जनस्य वा वाचकः । उपनिषदादिषु सत्त्वरजस्तमोगुणपारवश्याभावात् निर्गुणमित्युक्तिरिति विशेषः । तथा, 'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्' इति श्रुतिमुपादाय, 'सा देवी

श्रीरिति प्रोक्ता । तमनयैव सह देवेशमर्चयन्ति परमर्षयः । सा प्रकृतिः । तदभिन्नाः सर्वाः स्त्रियः । पुरुषास्तदभिन्नाः । ताभ्यां स्थितिः । तस्मात् सहैवार्चयेत् । विष्णोर्विभूतिः श्रीर्नित्या' इत्येवं ज्ञानकाण्डे, आनन्दसंहितायाश्चोक्तम् । तदीयब्रह्मसूत्रभाष्ये च श्रियो विभुत्वादिकं विस्तरेण व्युदपादि । अतः श्रुतिनिगूढश्रीतत्त्ववैशद्यं पाञ्चरात्रत इव वैखानसतोऽपि विज्ञायते ।

एवं तत्त्वविषय इवोपायविषयेऽप्यैकरस्यमेव । "भगवन्मायया मोहितत्वात् भगवन्तं समाश्रित्य भक्त्या नारायणमुपासीत । तदुपासनात् सोऽपि भक्तवत्सलत्वात् मोचयति । तत आत्मा सम्यग्ज्ञानं प्रविशति । पश्चादाश्रमधर्मयुक्तो भगवदाराधनं करोति । तदाराधनेन जीवात्मा परमात्मानं पश्यति । सोऽप्यपुनरावृत्तिकं प्रसादयति" इति ह्युक्तमानन्द-संहितायाम् । अत्रोक्तं भक्त्या नारायणोपासनम्, 'भक्त्या शास्त्राद्वेद्मि जनार्दनम्,' 'मननव्यपदेशभाक् उपासनैव क्रियते' इत्युक्तश्रवणमननकर्मयोगादिरूपम् । ततो ज्ञानप्रतिबन्धकनिवर्तनरूपं मोचनम् । ततः जीवात्मदर्शनं नारायणपारम्य-भक्त्यनुष्ठानौपयिकाकारावधारणादि । अयं सम्यग्ज्ञानप्रवेशः । ततः, 'मत्कर्मपरमो भव' इति गीतभगवदाराधनादिकमन्तरङ्गभूतं कर्म । ततो भवत् दर्शनसमानाकारध्यानमेव पश्यतीति पदेनोक्तम् । ततो भगवत्प्रसादद्वारा मोक्ष इति सर्वं संप्रतिपन्नमेव खलु । आदित आरभ्य आध्यानसमाप्ति सर्वं भगवत्समाश्रयणपदेनापि सामान्यतो व्यपदिश्यते । तदिदं दर्शयितुमुपरि तत् चतुर्धा विभजति-जपहुतार्चनध्यानरूपेण । अत्र च सावित्रीपूर्वकविविधभगवन्मन्त्रजपस्य, अग्निहोत्रादिहोमस्य, गृहे देवायतने वा प्रतिष्ठितप्रतिमार्चनस्य च पूर्वं निर्देशः ध्यानस्य चरमोपायत्वं दर्शयति । निष्पन्नध्यानैरपि प्रारब्धकर्मवैचित्र्यकालदैर्घ्यादिरनवधारणात्, क्षणमात्रध्यानवैकल्यस्य च महाहानिरूपतां मन्यमानैः प्रतिबन्धकविलोपनाय प्रत्यवायपरिहाराय लोकसंग्रहाय च यावदायुरनुवृत्ति अर्चनान्तं सर्वं कृत्यं कर्तव्यमेव भवति । तत्रोपायताबुद्ध्याऽनुष्ठानमपि जातु भवेत् । उपायतां विस्मृत्य भक्तिपरीवाहरूपेण अकरणे आत्मधारणमलभमानैः प्रियसुहृत्प्रीणनायोच्चावचमुद्युञ्जानलौकिकन्यायेन परमोत्साहेन कदाचिदनुष्ठीयेत । तदा तावदर्चनादेर्भक्तिरूपोपायान्तर्गतिरेव । सर्वथा स्वामिसंप्रीतिरेव साक्षात् फलम् ।

तदत्र हुतार्चनयोः प्रकृतिविकृतिभावचिन्तायां वक्तव्यं तावत् - पूर्वोक्तरीत्या परमपदे वैकुण्ठे समप्राकारपरिवृतायां पुर्याम् अयोध्येति अपराजितेति च प्रसिद्धायां सुवर्णपुरतोरणसहस्रभासुरे सहस्रादित्यसंकाशे सर्वदिव्यरत्नमये दिव्यविमाने सहस्रस्थूणमहामण्टपनिविष्टनिःसंख्यनित्यसूरिनिरन्तरतन्यमानस्तवनार्चनादिसहस्र-विधोपचारसंप्रीतस्य निर्मुक्तसंसारजीवजातनीरन्ध्रनिषेव्यमाणचरणारविन्दस्य, सहस्र फणसमुल्लसन्मणिनिकरमयूखमण्डलबहुगुणितप्रकाशदिव्यधामोदरे प्रकृष्टविज्ञानबलधाम्नि शेष इति स्वाख्याविख्यापितस्वकैङ्कर्यसाम्राज्ये स्वगुणान्तदर्शनं परेषां नास्तीति स्वयमनन्तनाम्नैव प्रथिते फणिराजे अपेक्षितवति शैत्यसौत्यसौन्दर्यसौगन्ध्य-सौकुमार्यसमाहारायमाणे तदीयदिव्यभोगे देदीप्यमानस्य, दिव्योदरबन्धक-प्रकाशपुञ्जायमानदिव्यपीताम्बरस्य श्री - श्रीवत्स-कौस्तुभ-निखिलविधरत्नहारव्रात - निरुपमवनमालादिनित्यालंकृतभुजान्तरस्य उदारपीवरचतुर्भुजस्य मकरकुण्डलस्फुरण-भासुरगण्डप्रसारिमन्दस्मितमयूखपूर्वप्रसृत्वर-गम्भीराम्भःसंभूतसुविमृष्टनालरविकर-विकसितपुण्डरीकदलामलविलोचनभव्यदृष्टिप्लाव्यमानपारिषदबृन्दस्य परस्सहस्र-सूर्यप्रभासमुदायगोष्पदीकरणाविचक्षण - विश्वप्रसारिविद्योतप्रवाहदिव्यकिरीटदर्शितो-भयविभूतिनायकभावस्य निखिलदेवीबृन्ददिव्यायुधगणादिनिषेवितस्य भगवतो नारायणस्य तत्र क्रियमाणं यादृशं सेवनम्, तादृशमत्रापि सर्वेषामभ्यासपथमानेयमिति तावत् प्रथमः श्रीमतः संकल्पः । तच्च बिम्बध्यानविधानमन्तरा न जाघटीतीति तदादौ प्रचारितमासीत् । अतो मोक्षकैङ्कर्यबिम्बार्चनयोः साक्षात् प्रकृतिविकृतिभावः संस्कृतभाषाप्राकृत-भाषयोरिव । क्रमेण सृष्टौ सन्तन्यमानायाम्, प्रजासु च, 'कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः' इति देवतान्तरसेवनश्रद्धायामभिवृद्धायाम्, देवतान्तरतत्तन्मूर्तिगोपनाय सर्वजनैकरस्याय आपाततो देवतान्तरवाचकैः, अन्ततः परिशीलने स्वाभिधानसमर्थैः अग्नीन्द्रादिनामभिः परश्शताः यागहोमादयः प्रचारिता बभूवुः । ध्यानान्तरङ्ग-तयाऽवश्यकर्तव्यस्यार्चनस्य सर्वलोकयोगक्षेमसंपत्त्यर्थत्वस्यापि सिद्धये तत्तल्लोक-विराजमानस्वतत्तन्मूर्तिप्रतिष्ठापद्धतिः यादृशी वस्तुतोऽस्ति, तत्सारूप्यस्य आधानाग्नि-

होत्रादौ यथायथं परिकल्पने विवेकिनां प्रतिमार्चनस्फूर्त्या मुख्ये तत्र मनः क्रमेण पदं दध्यादिति विभाव्य वैदिककर्माचरणे तत्सारूप्यं पर्यकल्पि ।

अत एव तदमुख्यत्वज्ञापनाय, 'प्लवा ह्येते अदृढा यज्ञरूपाः अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दति मूढाः जरामृत्यू ते पुनरेवापियन्ति' इति यज्ञनिन्दाऽप्यकारि । नन्वेवं कर्मत्वाविशेषात् अर्चनमपि निन्द्यमेव । नैवम् । तत्र हि त्रेताग्निसाध्यान् यागहोमान् प्रस्तुत्य, 'एष वः पुण्यः सुकृतो ब्रह्मलोकः' इति अनित्यलोकप्रापकत्वं प्रदर्श्य तन्निन्दनमकारि । पुण्य इत्यनेनैव पुण्यसाध्यत्वे ज्ञायमाने सुकृत इति पदम्, सम्यक् कृतः = निष्पादितः सृष्टः अत एवानित्य इत्यर्थं ध्वनयितुमेव प्रयुक्तम् । पूर्वोक्तमन्त्रेऽपि अवरकर्म यत्रास्ति, स एव यज्ञो निन्दितः । त एव तु यज्ञाः फलाभिसंधिं विना क्रियमाणाः न निन्द्या भवन्ति । अत एव, 'यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्' इति निश्चय आविर्भावितः श्रीकृष्णेन । अनिच्छायामपि उप्तानां पतितानाञ्च बीजानामङ्कुरोत्पादकत्वमिव कर्मणां बन्धकत्वमवर्जनीयमित्याशङ्क्य बीजवैषम्यं धर्मिग्राहकमानसिद्धमित्याशयेन गीतम्, "अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् । भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्" इति । बहिरङ्गाणामीदृशकर्मणामेवानिन्द्यत्वे, कैमुत्यसिद्धं भगवदनाराधनत्वाकाररूपदोषप्रसक्तिविधुराणां भोगसमर्पणरूपाणां भगवदर्चनपद्धतीनां प्राशस्त्यम् ।

अत एव श्रीभागवते (११-४),

'वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यात् लभते सिद्धिं रोचनार्था फलश्रुतिः ।।

य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः ।
विधिनोपचरेत् देवं तन्त्रोक्तेन च केशवम् ।।'

इति, 'बालोपच्छन्दनार्थमधुमिश्रौषधन्यायेन रोचनार्थतां फलवचनस्य विज्ञाय फलाशां परित्यज्य तान्येव वैदिकानि कर्माणि कृतानि सर्वपापक्षयाय भवन्ति । अञ्जसा रागद्वेषाद्यशेषहृदयग्रन्थिभेदनं तु परमात्माराधनरूपेण वैदिकेन तन्त्रोक्तेन च अर्चनेनैव', इति कर्मतत्त्वमुपदिष्टमस्ति ।

न चेदमर्चनं पृथग्भूय मोक्षं ददाति, किंतु ध्यानान्तर्भावं प्राप्यैव, अन्तर्गतध्यानश्च, ध्यानपरीवाहतया चेति न कश्चिद् दोषः । तथाच प्राकृतक्षुद्रपर्यवसायि कृत्रिमं कर्म सर्वं त्याज्यम् ; स्वरूपानुरूपतया स्वाभाविकमकृत्रिमं प्राकृताप्राकृतदेहसाध्यं सर्वं ग्राह्यमिति विवेकः ।

तत् सिद्धं परमपदे श्रीमतो नारायणस्य निरन्तरकैङ्कर्यं परमः पुरुषार्थः । तदर्थविहितानां वैदिककर्मणां तथात्वमबुद्ध्वा नानाकामहृतज्ञानैरन्यदेवताद्यर्थतया तदाचरणमधमम् । तदर्थप्रवृत्तानि सूत्रादिशास्त्राणि च तथा । तान्येव सात्त्विकत्यागपुरस्सरं मुमुक्षुभिरनुष्ठीयन्ते चेत्-प्रशस्यन्ते । तत्रापि कर्मयोगप्रभेदेषु प्रथमनिविष्टं 'दैवमेवापरे यज्ञम्' इति गीतं देवदेवार्चनम् । कर्मयोगज्ञानयोगसंस्कृतमनोदृष्टजीवात्मस्वरूपस्य भक्तौ अवतीर्णस्य अतिविततम् अर्चासमाराधनं ध्यानान्तरङ्गोपायः । तदपि भक्तिपरीवाहरूपेण प्रतन्यमानं मुख्योपायकोटिमेव आटीकते । तदेवोपायत्वबुद्धिं सर्वथैव परित्यज्य प्रपत्तिसिद्धमोक्षैः परमपदे नित्यसूरिभिरिव प्रवर्त्यते चेत्-भौमोऽयमपवर्गः । एतदर्थमेव तु सर्वमध्ययनं प्रवचनं देहधारणं तदर्थनित्यकर्मानुष्ठानमित्यादीति ।

इत्थम्भूतमर्चाराधनं व्युदपादि विस्तरेण वैखानसैः पाञ्चरात्रैश्च । तत्र नानासूत्रबहुमहाजनपरिगृहीततया, कलेरादौ प्रापिताधिकप्रचारतया च पाञ्चरात्रग्रन्था असंख्याकाः । तत्र नानाविधाः परस्परासंकरेण रक्षणीया अर्चनापद्धतयः सात्त्विकराजसतामसभेदेन भोगमोक्षभेदेन च निरूपिताः सन्त्येव । एवमपि वैष्णवपरम्परामात्रेण विखनोमुनिप्रभृतिसेव्यमानं वैष्णवबलिना गर्भत एव वैष्णवभूतानां संघ एव संप्राप्तप्रचारं चत्वारिंशत्संस्कारविशेषेण आवश्यकतया विष्ण्वर्चनविधायकम् अत एवोपादेयानुपादेयविवेकश्रमप्रसक्त्यभावादक्षोभानुष्ठेयसर्वम् उपनयनप्रभृति समिदाधानवत् तदनुष्ठाननैर्भर्यदर्शकम्, अत्रिभृगुमरीचिकश्यपाख्यानेकमहर्षिप्रचारितत्वेपि अप्राप्तमिथोविरोधम् सर्वप्रजायोगक्षेमदृष्ट्या सर्वफलप्रसावकत्वेन मोक्षमात्रपराणां तदनुकूलत्वेन च निबद्धम्, श्रूयमाणवेदशाखानुसारि, वैदिकमन्त्रैकसाध्यतया सर्वप्रतिपादकं सत् श्रूयमाणवेदवैशद्यावहम्, सर्ववर्णाश्रमधर्माणामपि भगवदाराधनतां सम्यगवगमयत् परमं शास्त्रं वैखानसमिति वस्तुस्थितिरियं तत्त्वरुचिभिरमत्सरमधिगम्येति ।

उपनिषदुपदिष्टाः सन्ति विद्याः विचित्राः
क्वचिदव रता न ह्यन्यनिन्दा गुणाय ।
अनुपधिभगवद्भक्त्याद्यवेधोमुखोत्थं
विलसति सकलेड्यं वर्त्म वैखानसाख्यम् ।।६।।

वैखानसाध्वचरणानधिकार्यपीत्थं
तद्गौरवोक्तिरपि विष्णुसमर्चनेति ।
सच्चक्रवर्तिकुलजः कृतिभिश्च वित्तः
श्रीवीरराघव इमं विजयं व्यतानीत् ।।७।।

तर्कार्णवादिबिरुदः कृतनैकतन्त्र-
ग्रन्थव्रजोऽभिनवदेशिक इत्युपाख्यः ।
श्रीवीरराघव इमं विजयं समर्प्य
श्रीवेङ्कटेशपदपद्मयुगेऽस्मि धन्यः ।।८।।

इति उत्तमूर्-श्रीवात्स्यसच्चक्रवर्ति
वीरराघवाचार्यकृतिषु वैखानसविजयः संपूर्णः ।।
शुभमस्तु